# 12 Shrimaddevibhagavatamahapurane Dvadashah Skandhah

# ૧૨ શ્રીમદ્દેવીભાગવતમહાપુરાણે દ્વાદશઃ સ્કન્ધઃ

## Document Information


Text title : Devi Bhagavata Mahapurana Skandha 12

File name : devIbhAgavatam12.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૧૨ શ્રીમદ્દેવીભાગવતમહાપુરાણે દ્વાદશઃ સ્કન્ધઃ

## ૧૨.૧ પ્રથમોઽધ્યાયઃ । ગાયત્રીવિચારઃ ।

નારદ ઉવાચ ।
સદાચારવિધિર્દેવ ભવતા વર્ણિતઃ પ્રભો ।
તસ્યાપ્યતુલમાહાત્મ્યં સર્વપાપવિનાશનમ્ ॥ ૧॥

શ્રુતં ભવન્મુખામ્ભોજચ્ચ્યુતં દેવીકથામૃતમ્ ।
વ્રતાનિ યાનિ ચોક્તાનિ ચાન્દ્રાયણમુખાનિ તે ॥ ૨॥

દુઃખસાધ્યાનિ જાનીમઃ કર્તૃસાધ્યાનિ તાનિ ચ ।
તદસ્માત્સામ્પ્રતં યત્તુ સુખસાધ્યં શરીરિણામ્ ॥ ૩॥

દેવીપ્રસાદજનકં શુભાનુષ્ઠાનસિદ્ધિદમ્ ।
તત્કર્મ વદ મે સ્વામિન્ કૃપાપૂર્વં સુરેશ્વર ॥ ૪॥

સદાચારવિધૌ યશ્ચ ગાયત્રીવિધિરીરિતઃ ।
તસ્મિન્મુખ્યતમં કિં સ્યાત્કિં વા પુણ્યાધિકપ્રદમ્ ॥ ૫॥

યે ગાયત્રીગતા વર્ણાસ્તત્ત્વસઙ્ખ્યાસ્ત્વયેરિતાઃ ।
તેષાં કે ઋષયઃ પ્રોક્તાઃ કાનિ છન્દાંસિ વૈ મુને ॥ ૬॥

તેષાં કા દેવતાઃ પ્રોક્તાઃ સર્વં કથય મે પ્રભો ।
મહત્કૌતૂહલં મે ચ માનસે પરિવર્તતે ॥ ૭॥

શ્રીનારાયણાય ઉવાચ ।
કુર્યાદન્યન્ન વા કુર્યાદનુષ્ઠાનાદિકં તથા ।
ગાયત્રીમાત્રનિષ્ઠસ્તુ કૃતકૃત્યો ભવેદ્દ્વિજઃ ॥ ૮॥

સન્ધ્યાસુ ચાર્ઘ્યદાનં ચ ગાયત્રીજપમેવ ચ ।
સહસ્રત્રિતયં કુર્વન્સુરૈઃ પૂજ્યો ભવેન્મુને ॥ ૯॥

ન્યાસાન્કરોતુ વા મા વા ગાયત્રીમેવ ચાભ્યસેત્ ।

ધ્યાત્વા નિર્વ્યાજયા વૃત્ત્યા સચ્ચિદાનન્દરૂપિણીમ્ ॥ ૧૦॥

યદક્ષરૈકસંસિદ્ધેઃ સ્પર્ધતે બ્રાહ્મણોત્તમઃ ।
હરિશઙ્કરકઞ્જોત્થસૂર્યચન્દ્રહુતાશનૈઃ ॥ ૧૧॥

અથાતઃ શ્રૂયતાં બ્રહ્મન્ વર્ણઋષ્યાદિકાંસ્તથા ।
છન્દાંસિ દેવતાસ્તદ્વત્ક્રમાત્તત્ત્વાનિ ચૈવ હિ ॥ ૧૨॥

વામદેવોઽત્રિર્વસિષ્ઠઃ શુક્રઃ કણ્વઃ પરાશરઃ ।
વિશ્વામિત્રો મહાતેજાઃ કપિલઃ શૌનકો મહાન્ ॥ ૧૩॥

યાજ્ઞવલ્ક્યો ભરદ્વાજો જમદગ્નિસ્તપોનિધિઃ ।
ગૌતમો મુદ્ગલશ્ચૈવ વેદવ્યાસશ્ચ લોમશઃ ॥ ૧૪॥

અગસ્ત્યઃ કૌશિકો વત્સઃ પુલસ્ત્યો માણ્ડુકસ્તથા ।
દુર્વાસાસ્તપસાં શ્રેષ્ઠો નારદઃ કશ્યપસ્તથા ॥ ૧૫॥

ઇત્યેતે ઋષયઃ પ્રોક્તા વર્ણાનાં ક્રમશો મુને ।
ગાયત્ર્યુષ્ણિગનુષ્ટુપ્ ચ બૃહતી પઙ્ક્તિરેવ ચ ॥ ૧૬॥

ત્રિષ્ટુભં જગતી ચૈવ તથાતિજગતી મતા ।
શક્વર્યતિશક્વરી ચ ધૃતિશ્ચાતિધૃતિસ્તથા ॥ ૧૭॥

વિરાટ્પ્રસ્તારપઙ્ક્તિશ્ચ કૃતિઃ પ્રકૃતિરાકૃતિઃ ।
વિકૃતિઃ સઙ્કૃતિશ્ચૈવાક્ષરપઙ્ક્તિસ્તથૈવ ચ ॥ ૧૮॥

ભૂર્ભુવઃ સ્વરિતિચ્છન્દસ્તથા જ્યોતિષ્મતી સ્મૃતમ્ ।
ઇત્યેતાનિ ચ છન્દાંસિ કીર્તિતાનિ મહામુને ॥ ૧૯॥

દૈવતાનિ શ‍ૃણુ પ્રાજ્ઞ તેષામેવાનુપૂર્વશઃ ।
આગ્નેયં પ્રથમં પ્રોક્તં પ્રાજાપત્યં દ્વિતીયકમ્ ॥ ૨૦॥

તૃતીયં ચ તથા સૌમ્યમીશાનં ચ ચતુર્થકમ્ ।
સાવિત્રં પઞ્ચમં પ્રોક્તં ષષ્ઠમાદિત્યદૈવતમ્ ॥ ૨૧॥

બાર્હસ્પત્યં સપ્તમં તુ મૈત્રાવરુણમષ્ટમમ્ ।
નવમં ભગદૈવત્યં દશમં ચાર્યમેશ્વરમ્ ॥ ૨૨॥

ગણેશમેકાદશકં ત્વાષ્ટ્રં દ્વાદશકં સ્મૃતમ્ ।
પૌષ્ણં ત્રયોદશં પ્રોક્તમૈન્દ્રાગ્નં ચ ચતુર્દશમ્ ॥ ૨૩॥

વાયવ્યં પઞ્ચદશકં વામદૈવ્યં ચ ષોડશમ્ ।
મૈત્રાવરુણિદૈવત્યં પ્રોક્તં સપ્તદશાક્ષરમ્ ॥ ૨૪॥

અષ્ટાદશં વૈશ્વદેવમૂનવિંશં તુ માતૃકમ્ ।
વૈષ્ણવં વિંશતિતમં વસુદૈવતમીરિતમ્ ॥ ૨૫॥

એકવિંશતિસઙ્ખ્યાકં દ્વાવિંશં રુદ્રદૈવતમ્ ।
ત્રયોવિંશં ચ કૌબેરમાશ્વિનં તત્ત્વસઙ્ખ્યકમ્ ॥ ૨૬॥

ચતુર્વિંશતિવર્ણાનાં દેવતાનાં ચ સઙ્ગ્રહઃ ।
કથિતઃ પરમશ્રેષ્ઠો મહાપાપૈકશોધનઃ ।
યદાકર્ણનમાત્રેણ સાઙ્ગં જાપ્યફલં મુને ॥ ૨૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં દ્વાદશસ્કન્ધે ગાયત્રીવિચારો નામ પ્રથમોઽધ્યાયઃ ॥ ૧૨.૧॥

## ૧૨.૨ દ્વિતીયોઽધ્યાયઃ । ગાયત્રિશક્ત્યાદિપ્રતિપાદનમ્ ।

શ્રીનારાયણ ઉવાચ ।
વર્ણાનાં શક્તયઃ કાશ્ચ તાઃ શૃણુષ્વ મહામુને ।
વામદેવી પ્રિયા સત્યા વિશ્વા ભદ્રવિલાસિની ॥ ૧॥

પ્રભાવતી જયા શાન્તા કાન્તા દુર્ગા સરસ્વતી ।
વિદ્રુમા ચ વિશાલેશા વ્યાપિની વિમલા તથા ॥ ૨॥

તમોઽપહારિણી સૂક્ષ્મા વિશ્વયોનિર્જયા વશા ।
પદ્માલયા પરા શોભા ભદ્રા ચ ત્રિપદા સ્મૃતા ॥ ૩॥

ચતુર્વિંશતિવર્ણાનાં શક્તયઃ સમુદાહૃતાઃ ।
અતઃ પરં વર્ણવર્ણાન્વ્યાહરામિ યથાતથમ્ ॥ ૪॥

ચમ્પકા અતસીપુષ્પસન્નિભં વિદ્રુમં તથા ।
સ્ફટિકાકારકં ચૈવ પદ્મપુષ્પસમપ્રભમ્ ॥ ૫॥

તરુણાદિત્યસઙ્કાશં શઙ્ખકુન્દેન્દુસન્નિભમ્ ।
પ્રવાલપદ્મપત્રાભં પદ્મરાગસમપ્રભમ્ ॥ ૬॥

ઇન્દ્રનીલમણિપ્રખ્યં મૌક્તિકં કુઙ્કુમપ્રભમ્ ।
અઞ્જનાભં ચ રક્તં ચ વૈદૂર્યં ક્ષૌદ્રસન્નિભમ્ ॥ ૭॥

હારિદ્રં કુન્દદુગ્ધાભં રવિકાન્તિસમપ્રભમ્ ।
શુકપુચ્છનિભં તદ્વચ્છતપત્રનિભં તથા ॥ ૮॥

કેતકીપુષ્પસઙ્કાશં મલ્લિકાકુસુમપ્રભમ્ ।
કરવીરશ્ચ ઇત્યેતે ક્રમેણ પરિકીર્તિતાઃ ॥ ૯॥

વર્ણાઃ પ્રોક્તાશ્ચ વર્ણાનાં મહાપાપવિશોધનાઃ ।
પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશ એવ ચ ॥ ૧૦॥

ગન્ધો રસશ્ચ રૂપં ચ શબ્દઃ સ્પર્શસ્તથૈવ ચ ।
ઉપસ્થં પાયુપાદં ચ પાણી વાગપિ ચ ક્રમાત્ ॥ ૧૧॥

પ્રાણં જિહ્વા ચ ચક્ષુશ્ચ ત્વક્શ્રોત્રં ચ તતઃ પરમ્ ।
પ્રાણોઽપાનસ્તથા વ્યાનઃ સમાનશ્ચ તતઃ પરમ્ ॥ ૧૨॥

તત્ત્વાન્યેતાનિ વર્ણાનાં ક્રમશઃ કીર્તિતાનિ તુ ।
અતઃ પરં પ્રવક્ષ્યામિ વર્ણમુદ્રાઃ કમેણ તુ ॥ ૧૩॥

સુમુખં સમ્પુટં ચૈવ વિતતં વિસ્મૃતં તથા ।
દ્વિમુખં ત્રિમુખં ચૈવ ચતુઃપઞ્ચમુખં તથા ॥ ૧૪॥

ષણ્મુખાધોમુખં ચૈવ વ્યાપકાઞ્જલિકં તથા ।
શકટં યમપાશં ચ ગ્રથિતં સન્મુખોન્મુખમ્ ॥ ૧૫॥

વિલમ્બં મુષ્ટિકં ચૈવ મત્સ્યં કૂર્મં વરાહકમ્ ।
સિંહાક્રાન્તં મહાક્રાન્તં મુદ્ગરં પલ્લવં તથા ॥ ૧૬॥

ત્રિશૂલયોની સુરભિશ્ચાક્ષમાલા ચ લિઙ્ગકમ્ ।
અમ્બુજં ચ મહામુદ્રાસ્તુર્યરૂપાઃ પ્રકીર્તિતાઃ ॥ ૧૭॥

ઇત્યેતાઃ કીર્તિતા મુદ્રા વર્ણાનાં તે મહામુને ।
મહાપાપક્ષયકરાઃ કીર્તિદાઃ કાન્તિદા મુને ॥ ૧૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદસ્કન્ધે ગાયત્રિશક્ત્યાદિપ્રતિપાદનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૧૨.૨॥

## ૧૨.૩ તૃતીયોઽધ્યાયઃ । ગાયત્રીમન્ત્રકવચવર્ણનમ્ ।

નારદ ઉવાચ ।
સ્વામિન્સર્વજગન્નાથ સંશયોઽસ્તિ મમ પ્રભો ।

ચતુઃષષ્ટિકલાભિજ્ઞ પાતકાદ્યોગવિદ્વર ॥ ૧॥

મુચ્યતે કેન પુણ્યેન બ્રહ્મરૂપઃ કથં ભવેત્ ।
દેહશ્ચ દેવતારૂપો મન્ત્રરૂપો વિશેષતઃ ॥ ૨॥

કર્મ તચ્છ્રોતુમિચ્છામિ ન્યાસં ચ વિધિપૂર્વકમ્ ।
ઋષિશ્છન્દોઽધિદૈવં ચ ધ્યાનં ચ વિધિવદ્વિભો ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
અસ્ત્યેકં પરમં ગુહ્યં ગાયત્રીકવચં તથા ।
પઠનાદ્ધારણાન્મર્ત્યઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪॥

સર્વાન્કામાનવાપ્નોતિ દેવીરૂપશ્ચ જાયતે ।
ગાયત્રીકવચસ્યાસ્ય બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૫॥

ઋષયો ઋગ્યજુઃસામાથર્વશ્છન્દાંસિ નારદ ।
બ્રહ્મરૂપા દેવતોક્તા ગાયત્રી પરમા કલા ॥ ૬॥

તદ્બીજં ભર્ગ ઇત્યેષા શક્તિરુક્તા મનીષિભિઃ ।
કીલકં ચ ધિયઃ પ્રોક્તં મોક્ષાર્થે વિનિયોજનમ્ ॥ ૭॥

ચતુર્ભિર્હૃદયં પ્રોક્તં ત્રિભિર્વર્ણૈઃ શિરઃ સ્મૃતમ્ ।
ચતુર્ભિઃ સ્યાચ્છિખા પશ્ચાત્ ત્રિભિસ્તુ કવચં સ્મૃતમ્ ॥ ૮॥

ચતુર્ભિર્નેત્રમુદ્દિષ્ટં ચતુર્ભિઃ સ્યાત્તદસ્ત્રકમ્ ।
અથ ધ્યાનં પ્રવક્ષ્યામિ સાધકાભીષ્ટદાયકમ્ ॥ ૯॥

મુક્તાવિદ્રુમહેમનીલધવલચ્છાયૈર્મુખૈસ્ત્રીક્ષણૈ-
ર્યુક્તામિન્દુનિબદ્ધરત્નમુકુટાં તત્ત્વાર્થવર્ણાત્મિકામ્ ।
ગાયત્રીં વરદાભયાઙ્કુશકશાઃ શુભ્રં કપાલં ગુણં
શઙ્ખં ચક્રમથારવિન્દયુગલં હસ્તૈર્વહન્તીં ભજે ॥ ૧૦॥

ગાયત્રી પૂર્વતઃ પાતુ સાવિત્રી પાતુ દક્ષિણે ।
બ્રહ્મસન્ધ્યા તુ મે પશ્ચાદુત્તરાયાં સરસ્વતી ॥ ૧૧॥

પાર્વતી મે દિશં રક્ષેત્પાવકીં જલશાયિની ।
યાતુધાની દિશં રક્ષેદ્યાતુધાનભયઙ્કરી ॥ ૧૨॥

પાવમાની દિશં રક્ષેત્પવમાનવિલાસિની ।
દિશં રૌદ્રી ચ મે પાતુ રુદ્રાણી રુદ્રરૂપિણી ॥ ૧૩॥

ઊર્ધ્વં બ્રહ્માણી મે રક્ષેદધસ્તાદ્વૈષ્ણવી તથા ।
એવં દશ દિશો રક્ષેત્સર્વાઙ્ગં ભુવનેશ્વરી ॥ ૧૪॥

તત્પદં પાતુ મે પાદૌ જઙ્ઘે મે સવિતુઃ પદમ્ ।
વરેણ્યં કટિદેશે તુ નાભિં ભર્ગસ્તથૈવ ચ ॥ ૧૫॥

દેવસ્ય મે તદ્ધૃદયં ધીમહીતિ ચ ગલ્લયોઃ ।
ધિયઃ પદં ચ મે નેત્રે યઃ પદં મે લલાટકમ્ ॥ ૧૬॥

નઃ પાતુ મે પદં મૂર્ધ્નિ શિખાયાં મે પ્રચોદયાત્ ।
તત્પદં પાતુ મૂર્ધાનં સકારઃ પાતુ ભાલકમ્ ॥ ૧૭॥

ચક્ષુષી તુ વિકારાર્ણસ્તુકારસ્તુ કપોલયોઃ ।
નાસાપુટં વકારાર્ણો રેકારસ્તુ મુખે તથા ॥ ૧૮॥

ણિકાર ઊર્ધ્વમોષ્ઠં તુ યકારસ્ત્વધરોષ્ઠકમ્ ।
આસ્યમધ્યે ભકારાર્ણો ર્ગોકારશ્ચિબુકે તથા ॥ ૧૯॥

દેકારઃ કણ્ઠદેશે તુ વકારઃ સ્કન્ધદેશકમ્ ।
સ્યકારો દક્ષિણં હસ્તં ધીકારો વામહસ્તકમ્ ॥ ૨૦॥

મકારો હૃદયં રક્ષેદ્ધિકાર ઉદરે તથા ।
ધિકારો નાભિદેશે તુ યોકારસ્તુ કટિં તથા ॥ ૨૧॥

ગુહ્યં રક્ષતુ યોકાર ઊરૂ દ્વૌ નઃ પદાક્ષરમ્ ।
પ્રકારો જાનુની રક્ષેચ્ચોકારો જઙ્ઘદેશકમ્ ॥ ૨૨॥

દકારં ગુલ્ફદેશે તુ યકારઃ પદયુગ્મકમ્ ।
તકારવ્યઞ્જનં ચૈવ સર્વાઙ્ગં મે સદાવતુ ॥ ૨૩॥

ઇદં તુ કવચં દિવ્યં બાધાશતવિનાશનમ્ ।
ચતુઃષષ્ટિકલાવિદ્યાદાયકં મોક્ષકારકમ્ ॥ ૨૪॥

મુચ્યતે સર્વપાપેભ્યઃ પરં બ્રહ્માધિગચ્છતિ ।
પઠનાચ્છ્રવણાદ્વાપિ ગોસહસ્રફલં લભેત્ ॥ ૨૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે ગાયત્રીમન્ત્રકવચવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૧૨.૩॥

## ૧૨.૪ ચતુર્થોઽધ્યાયઃ । ગાયત્રીહૃદયમ્ ।

નારદ ઉવાચ ।
ભગવન્ દેવદેવેશ ભૂતભવ્યજગત્પ્રભો ।
કવચં ચ શ્રુતં દિવ્યં ગાયત્રીમન્ત્રવિગ્રહમ્ ॥ ૧॥

અધુના શ્રોતુમિચ્છામિ ગાયત્રીહૃદયં પરમ્ ।
યદ્ધારણાદ્ભવેત્પુણ્યં ગાયત્રીજપતોઽખિલમ્ ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
દેવ્યાશ્ચ હૃદયં પ્રોક્તં નારદાથર્વણે સ્ફુટમ્ ।
તદેવાહં પ્રવક્ષ્યામિ રહસ્યાતિરહસ્યકમ્ ॥ ૩॥

વિરાડ્રૂપાં મહાદેવીં ગાયત્રીં વેદમાતરમ્ ।
ધ્યાત્વા તસ્યાસ્ત્વથાઙ્ગેષુ ધ્યાયેદેતાશ્ચ દેવતાઃ ॥ ૪॥

પિણ્ડબ્રહ્માણ્ડયોરૈક્યાદ્ભાવયેત્સ્વતનૌ તથા ।
દેવીરૂપે નિજે દેહે તન્મયત્વાય સાધકઃ ॥ ૫॥

નાદેવોઽભ્યર્ચયેદ્દેવમિતિ વેદવિદો વિદુઃ ।
તતોઽભેદાય કાયે સ્વે ભાવયેદ્દેવતા ઇમાઃ ॥ ૬॥

અથ તત્સમ્પ્રવક્ષ્યામિ તન્મયત્વમથો ભવેત્ ।
ગાયત્રીહૃદયસ્યાસ્યાપ્યહમેવ ઋષિઃ સ્મૃતઃ ॥ ૭॥

ગાયત્રીચ્છન્દ ઉદ્દિષ્ટં દેવતા પરમેશ્વરી ।
પૂર્વોક્તેન પ્રકારેણ કુર્યાદઙ્ગાનિ ષટ્ક્રમાત્ ।
આસને વિજને દેશે ધ્યાયેદેકાગ્રમાનસઃ ॥ ૮॥

ન્યાસઃ
દ્યૌર્મૂર્ધ્નિ દૈવતં । દન્તપઙ્ક્તાવશ્વિનૌ । ઉભે સન્ધ્યે
ચોષ્ઠૌ । મુખમગ્નિઃ । જિહ્વા સરસ્વતી । ગ્રીવાયાં તુ
બૃહસ્પતિઃ । સ્તનયોર્વસવોઽષ્ટૌ । બાહ્વોર્મરુતઃ । હૃદયે
પર્જન્યઃ । આકાશમુદરં । નાભાવન્તરિક્ષં । કટ્યો-
રિન્દ્રાગ્ની । જઘને વિજ્ઞાનઘનઃ પ્રજાપતિઃ । કૈલાસ-
મલયે ઊરૂ । વિશ્વેદેવા જાન્વોઃ । જઙ્ઘાયાં કૌશિકઃ ।
ગુહ્યમયને । ઊરૂ પિતરઃ । પાદૌ પૃથિવી । વનસ્પત-
યોઽઙ્ગુલીષુ । ઋષયો રોમાણિ । નખાનિ મુહૂર્તાનિ ।

અસ્થિષુ ગ્રહાઃ । અસૃઙ્માંસમૃતવઃ । સંવત્સરા વૈ નિમિષમ્ ।
અહોરાત્રાવાદિત્યશ્ચન્દ્રમાઃ । પ્રવરાં દિવ્યાં ગાયત્રીં
સહસ્રનેત્રાં શરણમહં પ્રપદ્યે । ૐ તત્સવિતુર્વરેણ્યાય
નમઃ । ૐ તત્પૂર્વાજયાય નમઃ । તત્પ્રાતરાદિત્યાય નમઃ ।
તત્પ્રાતરાદિત્યપ્રતિષ્ઠાયૈ નમઃ । પ્રાતરધીયાનો રાત્રિકૃતં
પાપં નાશયતિ । સાયમધીયાનો દિવસકૃતં પાપં
નાશયતિ । સાયમ્પ્રાતરધીયાનો અપાપો ભવતિ ।
સર્વતીર્થેષુ સ્નાતો ભવતિ । સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ ।
અવાચ્યવચનાત્પૂતો ભવતિ । અભક્ષ્યભક્ષણાત્પૂતો
ભવતિ । અભોજ્યભોજનાપૂતો ભવતિ । અચોષ્યચોષ-
ણાત્પૂતો ભવતિ । અસાધ્યસાધનાત્પૂતો ભવતિ ।
દુષ્પ્રતિગ્રહશતસહસ્રાત્પૂતો ભવતિ । સર્વપ્રતિગ્રહાત્પૂતો
ભવતિ । પઙ્ક્તિદૂષણાત્પૂતો ભવતિ । અનૃતવચનાત્પૂતો
ભવતિ । અથાબ્રહ્મચારી બ્રહ્મચારી ભવતિ । અનેન
હૃદયેનાધીતેન ક્રતુસહસ્રેણેષ્ટં ભવતિ । ષષ્ટિશત-
સહસ્રગાયત્ર્યા જપ્યાનિ ફલાનિ ભવન્તિ । અષ્ટૌ
બ્રાહ્મણાન્સમ્યગ્ગ્રાહયેત્ । તસ્ય સિદ્ધિર્ભવતિ । ય ઇદં
નિત્યમધીયાનો બ્રાહ્મણઃ પ્રાતઃ શુચિઃ સર્વપાપૈઃ
પ્રમુચ્યત ઇતિ । બ્રહ્મલોકે મહીયતે । ઇત્યાહ ભગવાન્ શ્રીનારાયણઃ ।

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે ગાયત્રીહૃદયં નામ ચતુર્થોઽધ્યાયઃ ॥ ૧૨.૪॥

## ૧૨.૫ પઞ્ચમોઽધ્યાયઃ । શ્રીગાયત્રીસ્તોત્રવર્ણનમ્ ।

નારદ ઉવાવ
ભક્તાનુકમ્પિન્ સર્વજ્ઞ હૃદયં પાપનાશનમ્ ।
ગાયત્ર્યાઃ કથિતં તસ્માદ્ગાયત્ર્યાઃ સ્તોત્રમીરય ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
આદિશક્તે જગન્માતર્ભક્તાનુગ્રહકારિણિ ।
સર્વત્ર વ્યાપિકેઽનન્તે શ્રીસન્ધ્યે તે નમોઽસ્તુ તે ॥ ૨॥

ત્વમેવ સન્ધ્યા ગાયત્રી સાવિત્રી ચ સરસ્વતી ।

બ્રાહ્મી ચ વૈષ્ણવી રૌદ્રી રક્તા શ્વેતા સિતેતરા ॥ ૩॥

પ્રાતર્બાલા ચ મધ્યાહ્ને યૌવનસ્થા ભવેત્પુનઃ ।
વૃદ્ધા સાયં ભગવતી ચિન્ત્યતે મુનિભિઃ સદા ॥ ૪॥

હંસસ્થા ગરુડારૂઢા તથા વૃષભવાહિની ।
ઋગ્વેદાધ્યાયિની ભૂમૌ દૃશ્યતે યા તપસ્વિભિઃ ॥ ૫॥

યજુર્વેદં પઠન્તી ચ અન્તરિક્ષે વિરાજતે ।
સા સામગાપિ સર્વેષુ ભ્રામ્યમાણા તથા ભુવિ ॥ ૬॥

રુદ્રલોકં ગતા ત્વં હિ વિષ્ણુલોકનિવાસિની ।
ત્વમેવ બ્રહ્મણો લોકેઽમર્ત્યાનુગ્રહકારિણી ॥ ૭॥

સપ્તર્ષિપ્રીતિજનની માયા બહુવરપ્રદા ।
શિવયોઃ કરનેત્રોત્થા હ્યશ્રુસ્વેદસમુદ્ભવા ॥ ૮॥

આનન્દજનની દુર્ગા દશધા પરિપઠ્યતે ।
વરેણ્યા વરદા ચૈવ વરિષ્ઠા વરવર્ણિની ॥ ૯॥

ગરિષ્ઠા ચ વરાર્હા ચ વરારોહા ચ સપ્તમી ।
નીલગઙ્ગા તથા સન્ધ્યા સર્વદા ભોગમોક્ષદા ॥ ૧૦॥

ભાગીરથી મર્ત્યલોકે પાતાલે ભોગવત્યપિ ।
ત્રિલોકવાહિની દેવી સ્થાનત્રયનિવાસિની ॥ ૧૧॥

ભૂર્લોકસ્થા ત્વમેવાસિ ધરિત્રી લોકધારિણી ।
ભુવો લોકે વાયુશક્તિઃ સ્વર્લોકે તેજસાં નિધિઃ ॥ ૧૨॥

મહર્લોકે મહાસિદ્ધિર્જનલોકે જનેત્યપિ ।
તપસ્વિની તપોલોકે સત્યલોકે તુ સત્યવાક્ ॥ ૧૩॥

કમલા વિષ્ણુલોકે ચ ગાયત્રી બ્રહ્મલોકદા ।
રુદ્રલોકે સ્થિતા ગૌરી હરાર્ધાઙ્ગનિવાસિની । ૧૪॥

અહમો મહતશ્ચૈવ પ્રકૃતિસ્ત્વં હિ ગીયસે ।
સામ્યાવસ્થાત્મિકા ત્વં હિ શબલબ્રહ્મરૂપિણી ॥ ૧૫॥

તતઃ પરા પરા શક્તિઃ પરમા ત્વં હિ ગીયસે ।
ઇચ્છાશક્તિઃ ક્રિયાશક્તિર્જ્ઞાનશક્તિસ્ત્રિશક્તિદા ॥ ૧૬॥

ગઙ્ગા ચ યમુના ચૈવ વિપાશા ચ સરસ્વતી ।
સરયૂર્દેવિકા સિન્ધુર્નર્મદૈરાવતી તથા ॥ ૧૭॥

ગોદાવરી શતદ્રૂશ્ચ કાવેરી દેવલોકગા ।
કૌશિકી ચન્દ્રભાગા ચ વિતસ્તા ચ સરસ્વતી ॥ ૧૮॥

ગણ્ડકી તાપિની તોયા ગોમતી વેત્રવત્યપિ ।
ઇડા ચ પિઙ્ગલા ચૈવ સુષુમ્ણા ચ તૃતીયકા ॥ ૧૯॥

ગાન્ધારી હસ્તિજિહ્વા ચ પૂષાપૂષા તથૈવ ચ ।
અલમ્બુષા કુહૂશ્ચૈવ શઙ્ખિની પ્રાણવાહિની ॥ ૨૦॥

નાડી ચ ત્વં શરીરસ્થા ગીયસે પ્રાક્તનૈર્બુધૈઃ ।
હૃત્પદ્મસ્થા પ્રાણશક્તિઃ કણ્ઠસ્થા સ્વપ્નનાયિકા ॥ ૨૧॥

તાલુસ્થા ત્વં સદાધારા બિન્દુસ્થા બિન્દુમાલિની ।
મૂલે તુ કુણ્ડલીશક્તિર્વ્યાપિની કેશમૂલગા ॥ ૨૨॥

શિખામધ્યાસના ત્વં હિ શિખાગ્રે તુ મનોન્મની ।
કિમન્યદ્બહુનોક્તેન યત્કિઞ્ચિજ્જગતીત્રયે ॥ ૨૩॥

તત્સર્વં ત્વં મહાદેવિ શ્રિયે સન્ધ્યે નમોઽસ્તુ તે ।
ઇતીદં કીર્તિતં સ્તોત્રં સન્ધ્યાયાં બહુપુણ્યદમ્ ॥ ૨૪॥

મહાપાપપ્રશમનં મહાસિદ્ધિવિધાયકમ્ ।
ય ઇદં કીર્તયેત્સ્તોત્રં સન્ધ્યાકાલે સમાહિતઃ ॥ ૨૫॥

અપુત્રઃ પ્રાપ્નુયાત્પુત્રં ધનાર્થી ધનમાપ્નુયાત્ ।
સર્વતીર્થતપોદાનયજ્ઞયોગફલં લભેત્ ॥ ૨૬॥

ભોગાન્ભુક્ત્વા ચિરં કાલમન્તે મોક્ષમવાપ્નુયાત્ ।
તપસ્વિભિઃ કૃતં સ્તોત્રં સ્નાનકાલે તુ યઃ પઠેત્ ॥ ૨૭॥

યત્ર કુત્ર જલે મગ્નઃ સન્ધ્યામજ્જનજં ફલમ્ ।
લભતે નાત્ર સન્દેહઃ સત્યં સત્યં ચ નારદ ॥ ૨૮॥

શૃણુયાદ્યોઽપિ તદ્ભક્ત્યા સ તુ પાપાત્પ્રમુચ્યતે ।
પીયૂષસદૃશં વાક્યં સન્ધ્યોક્તં નારદેરિતમ્ ॥ ૨૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે શ્રીગાયત્રીસ્તોત્રવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૧૨.૫॥

## ૧૨.૬ ષષ્ઠોઽધ્યાયઃ । ગાયત્રીસહસ્રનામસ્તોત્રવર્ણનમ્ ।

નારદ ઉવાચ ।
ભગવન્સર્વધર્મજ્ઞ સર્વશાસ્ત્રવિશારદ ।
શ્રુતિસ્મૃતિપુરાણાનાં રહસ્યં ત્વન્મુખાચ્છ્રુતમ્ ॥ ૧॥

સર્વપાપહરં દેવ યેન વિદ્યા પ્રવર્તતે ।
કેન વા બ્રહ્મવિજ્ઞાનં કિં નુ વા મોક્ષસાધનમ્ ॥ ૨॥

બ્રાહ્મણાનાં ગતિઃ કેન કેન વા મૃત્યુનાશનમ્ ।
ઐહિકામુષ્મિકફલં કેન વા પદ્મલોચન ॥ ૩॥

વક્તુમર્હસ્યશેષેણ સર્વં નિખિલમાદિતઃ ।
શ્રીનારાયણ ઉવાચ ।
સાધુ સાધુ મહાપ્રાજ્ઞ સમ્યક્ પૃષ્ટં ત્વયાનઘ ॥ ૪॥

શૃણુ વક્ષ્યામિ યત્નેન ગાયત્ર્યષ્ટસહસ્રકમ્ ।
નામ્નાં શુભાનાં દિવ્યાનાં સર્વપાપવિનાશનમ્ ॥ ૫॥

સૃષ્ટ્યાદૌ યદ્ભગવતા પૂર્વં પ્રોક્તં બ્રવીમિ તે ।
અષ્ટોત્તરસહસ્રસ્ય ઋષિર્બ્રહ્મા પ્રકીર્તિતઃ ॥ ૬॥

છન્દોઽનુષ્ટુપ્ તથા દેવી ગાયત્રી દેવતા સ્મૃતા ।
હલો બીજાનિ તસ્યૈવ સ્વરાઃ શક્તય ઈરિતાઃ ॥ ૭॥

અઙ્ગન્યાસકરન્યાસાવુચ્યેતે માતૃકાક્ષરૈઃ ।
અથ ધ્યાનં પ્રવક્ષ્યામિ સાધકાનાં હિતાય વૈ ॥ ૮॥

રક્તશ્વેતહિરણ્યનીલધવલૈર્યુક્તાં ત્રિનેત્રોજ્જ્વલાં
રક્તાં રક્તનવસ્રજં મણિગણૈર્યુક્તાં કુમારીમિમામ્ ।
ગાયત્રીં કમલાસનાં કરતલવ્યાનદ્ધકુણ્ડામ્બુજાં
પદ્માક્ષીં ચ વરસ્રજં ચ દધતીં હંસાધિરૂઢાં ભજે ॥ ૯॥

અચિન્ત્યલક્ષણાવ્યક્તાપ્યર્થમાતૃમહેશ્વરી ।
અમૃતાર્ણવમધ્યસ્થાપ્યજિતા ચાપરાજિતા ॥ ૧૦॥

અણિમાદિગુણાધારાપ્યર્કમણ્ડલસંસ્થિતા ।

અજરાજાપરાધર્મા અક્ષસૂત્રધરાધરા ॥ ૧૧॥

અકારાદિક્ષકારાન્તાપ્યરિષડ્વર્ગભેદિની ।
અઞ્જનાદ્રિપ્રતીકાશાપ્યઞ્જનાદ્રિનિવાસિની ॥ ૧૨॥

અદિતિશ્ચાજપાવિદ્યાપ્યરવિન્દનિભેક્ષણા ।
અન્તર્બહિઃસ્થિતાવિદ્યાધ્વંસિની ચાન્તરાત્મિકા ॥ ૧૩॥

અજા ચાજમુખાવાસાપ્યરવિન્દનિભાનના ।
અર્ધમાત્રાર્થદાનજ્ઞાપ્યરિમણ્ડલમર્દિની ॥ ૧૪॥

અસુરઘ્નીહ્યમાવાસ્યાપ્યલક્ષ્મીઘ્ન્યન્ત્યજાર્ચિતા ।
આદિલક્ષ્મીશ્ચાદિશક્તિરાકૃતિશ્ચાયતાનના ॥ ૧૫॥

આદિત્યપદવીચારાપ્યાદિત્યપરિસેવિતા ।
આચાર્યાવર્તનાચારાપ્યાદિમૂર્તિનિવાસિની ॥ ૧૬॥

આગ્નેયી ચામરી ચાદ્યા ચારાધ્યા ચાસનસ્થિતા ।
આધારનિલયાધારા ચાકાશાન્તનિવાસિની ॥ ૧૭॥

આદ્યાક્ષરસમાયુક્તા ચાન્તરાકાશરૂપિણી ।
આદિત્યમણ્ડલગતા ચાન્તરધ્વાન્તનાશિની ॥ ૧૮॥

ઇન્દિરા ચેષ્ટદા ચેષ્ટા ચેન્દીવરનિભેક્ષણા ।
ઇરાવતી ચેન્દ્રપદા ચેન્દ્રાણી ચેન્દુરૂપિણી ॥ ૧૯॥

ઇક્ષુકોદણ્ડસંયુક્તા ચેષુસન્ધાનકારિણી ।
ઇન્દ્રનીલસમાકારા ચેડાપિઙ્ગલરૂપિણી ॥ ૨૦॥

ઇન્દ્રાક્ષી ચેશ્વરી દેવી ચેહાત્રયવિવર્જિતા ।
ઉમા ચોષા હ્યુડુનિભા ઉર્વારુકફલાનના ॥ ૨૧॥

ઉડુપ્રભા ચોડુમતી હ્યુડુપા હ્યુડુમધ્યગા ।
ઊર્ધ્વં ચાપ્યૂર્ધ્વકેશી ચાપ્યૂર્ધ્વાધોગતિભેદિની ॥ ૨૨॥

ઊર્ધ્વબાહુપ્રિયા ચોર્મિમાલાવાગ્ગ્રન્થદાયિની ।
ઋતં ચર્ષિરૃતુમતી ઋષિદેવનમસ્કૃતા ॥ ૨૩॥

ઋગ્વેદા ઋણહર્ત્રી ચ ઋષિમણ્ડલચારિણી ।
ઋદ્ધિદા ઋજુમાર્ગસ્થા ઋજુધર્મા ઋતુપ્રદા ॥ ૨૪॥

ઋગ્વેદનિલયા ઋજ્વી લુપ્તધર્મપ્રવર્તિની ।
લૂતારિવરસમ્ભૂતા લૂતાદિવિષહારિણી ॥ ૨૫॥

એકાક્ષરા ચૈકમાત્રા ચૈકા ચૈકૈકનિષ્ઠિતા ।
ઐન્દ્રી હ્યૈરાવતારૂઢા ચૈહિકામુષ્મિકપ્રદા ॥ ૨૬॥

ઓઙ્કારા હ્યોષધી ચોતા ચોતપ્રોતનિવાસિની ।
ઔર્વા હ્યૌષધસમ્પન્ના ઔપાસનફલપ્રદા ॥ ૨૭॥

અણ્ડમધ્યસ્થિતા દેવી ચાઃકારમનુરૂપિણી ।
કાત્યાયની કાલરાત્રિઃ કામાક્ષી કામસુન્દરી ॥ ૨૮॥

કમલા કામિની કાન્તા કામદા કાલકણ્ઠિની ।
કરિકુમ્ભસ્તનભરા કરવીરસુવાસિની ॥ ૨૯॥

કલ્યાણી કુણ્ડલવતી કુરુક્ષેત્રનિવાસિની ।
કુરુવિન્દદલાકારા કુણ્ડલી કુમુદાલયા ॥ ૩૦॥

કાલજિહ્વા કરાલાસ્યા કાલિકા કાલરૂપિણી ।
કમનીયગુણા કાન્તિઃ કલાધારા કુમુદ્વતી ॥ ૩૧॥

કૌશિકી કમલાકારા કામચારપ્રભઞ્જિની ।
કૌમારી કરુણાપાઙ્ગી કકુબન્તા કરિપ્રિયા ॥ ૩૨॥

કેસરી કેશવનુતા કદમ્બકુસુમપ્રિયા ।
કાલિન્દી કાલિકા કાઞ્ચી કલશોદ્ભવસંસ્તુતા ॥ ૩૩॥

કામમાતા ક્રતુમતી કામરૂપા કૃપાવતી ।
કુમારી કુણ્ડનિલયા કિરાતી કીરવાહના । ૩૪॥

કૈકેયી કોકિલાલાપા કેતકી કુસુમપ્રિયા ।
કમણ્ડલુધરા કાલી કર્મનિર્મૂલકારિણી ॥ ૩૫॥

કલહંસગતિઃ કક્ષા કૃતકૌતુકમઙ્ગલા ।
કસ્તૂરીતિલકા કમ્રા કરીન્દ્રગમના કુહૂઃ ॥ ૩૬॥

કર્પૂરલેપના કૃષ્ણા કપિલા કુહરાશ્રયા ।
કૂટસ્થા કુધરા કમ્રા કુક્ષિસ્થાખિલવિષ્ટપા ॥ ૩૭॥

ખડ્ગખેટકરા ખર્વા ખેચરી ખગવાહના ।
ખટ્વાઙ્ગધારિણી ખ્યાતા ખગરાજોપરિસ્થિતા ॥ ૩૮॥

ખલઘ્ની ખણ્ડિતજરા ખણ્ડાખ્યાનપ્રદાયિની ।
ખણ્ડેન્દુતિલકા ગઙ્ગા ગણેશગુહપૂજિતા ॥ ૩૯॥

ગાયત્રી ગોમતી ગીતા ગાન્ધારી ગાનલોલુપા ।
ગૌતમી ગામિની ગાથા ગન્ધર્વાપ્સરસેવિતા ॥ ૪૦॥

ગોવિન્દચરણાક્રાન્તા ગુણત્રયવિભાવિતા ।
ગન્ધર્વી ગહ્વરી ગોત્રા ગિરીશા ગહના ગમી ॥ ૪૧॥

ગુહાવાસા ગુણવતી ગુરુપાપપ્રણાશિની ।
ગુર્વી ગુણવતી ગુહ્યા ગોપ્તવ્યા ગુણદાયિની ॥ ૪૨॥

ગિરિજા ગુહ્યમાતઙ્ગી ગરુડધ્વજવલ્લભા ।
ગર્વાપહારિણી ગોદા ગોકુલસ્થા ગદાધરા ॥ ૪૩॥

ગોકર્ણનિલયાસક્તા ગુહ્યમણ્ડલવર્તિની ।
ઘર્મદા ઘનદા ઘણ્ટા ઘોરદાનવમર્દિની ॥ ૪૪॥

ઘૃણિમન્ત્રમયી ઘોષા ઘનસમ્પાતદાયિની ।
ઘણ્ટારવપ્રિયા ઘ્રાણા ઘૃણિસન્તુષ્ટકારિણી ॥ ૪૫॥

ઘનારિમણ્ડલા ઘૂર્ણા ઘૃતાચી ઘનવેગિની ।
જ્ઞાનધાતુમયી ચર્ચા ચર્ચિતા ચારુહાસિની ॥ ૪૬॥

ચટુલા ચણ્ડિકા ચિત્રા ચિત્રમાલ્યવિભૂષિતા ।
ચતુર્ભુજા ચારુદન્તા ચાતુરી ચરિતપ્રદા ॥ ૪૭॥

ચૂલિકા ચિત્રવસ્ત્રાન્તા ચન્દ્રમઃકર્ણકુણ્ડલા ।
ચન્દ્રહાસા ચારુદાત્રી ચકોરી ચન્દ્રહાસિની ॥ ૪૮॥

ચન્દ્રિકા ચન્દ્રધાત્રી ચ ચૌરી ચૌરા ચ ચણ્ડિકા ।
ચઞ્ચદ્વાગ્વાદિની ચન્દ્રચૂડા ચોરવિનાશિની ॥ ૪૯॥

ચારુચન્દનલિપ્તાઙ્ગી ચઞ્ચચ્ચામરવીજિતા ।
ચારુમધ્યા ચારુગતિશ્ચન્દિલા ચન્દ્રરૂપિણી ॥ ૫૦॥

ચારુહોમપ્રિયા ચાર્વાચરિતા ચક્રબાહુકા ।
ચન્દ્રમણ્ડલમધ્યસ્થા ચન્દ્રમણ્ડલદર્પણા ॥ ૫૧॥

ચક્રવાકસ્તની ચેષ્ટા ચિત્રા ચારુવિલાસિની ।

ચિત્સ્વરૂપા ચન્દ્રવતી ચન્દ્રમાશ્ચન્દનપ્રિયા ॥ ૫૨॥

ચોદયિત્રી ચિરપ્રજ્ઞા ચાતકા ચારુહેતુકી ।
છત્રયાતા છત્રધરા છાયા છન્દઃપરિચ્છદા ॥ ૫૩॥

છાયાદેવીચ્છિદ્રનખા છન્નેન્દ્રિયવિસર્પિણી ।
છન્દોઽનુષ્ટુપ્પ્રતિષ્ઠાન્તા છિદ્રોપદ્રવભેદિની ॥ ૫૪॥

છેદા છત્રેશ્વરી છિન્ના છુરિકા છેદનપ્રિયા ।
જનની જન્મરહિતા જાતવેદા જગન્મયી ॥ ૫૫॥

જાહ્નવી જટિલા જેત્રી જરામરણવર્જિતા ।
જમ્બૂદ્વીપવતી જ્વાલા જયન્તી જલશાલિની ॥ ૫૬॥

જિતેન્દ્રિયા જિતક્રોધા જિતામિત્રા જગત્પ્રિયા ।
જાતરૂપમયી જિહ્વા જાનકી જગતી જરા ॥ ૫૭॥

જનિત્રી જહ્નુતનયા જગત્ત્રયહિતૈષિણી ।
જ્વાલામુખી જપવતી જ્વરઘ્ની જિતવિષ્ટપા ॥ ૫૮॥

જિતાક્રાન્તમયી જ્વાલા જાગ્રતી જ્વરદેવતા ।
જ્વલન્તી જલદા જ્યેષ્ઠા જ્યાઘોષાસ્ફોટદિઙ્મુખી ॥ ૫૯॥

જમ્ભિની જૃમ્ભણા જૃમ્ભા જ્વલન્માણિક્યકુણ્ડલા ।
ઝિઞ્ઝિકા ઝણનિર્ઘોષા ઝઞ્ઝામારુતવેગિની ॥ ૬૦॥

ઝલ્લરીવાદ્યકુશલા ઞરૂપા ઞભુજા સ્મૃતા ।
ટઙ્કબાણસમાયુક્તા ટઙ્કિની ટઙ્કભેદિની ॥ ૬૧॥

ટઙ્કીગણકૃતાઘોષા ટઙ્કનીયમહોરસા ।
ટઙ્કારકારિણી દેવી ઠઠશબ્દનિનાદિની ॥ ૬૨॥

ડામરી ડાકિની ડિમ્ભા ડુણ્ડુમારૈકનિર્જિતા ।
ડામરીતન્ત્રમાર્ગસ્થા ડમડ્ડમરુનાદિની ॥ ૬૩॥

ડિણ્ડીરવસહા ડિમ્ભલસત્ક્રીડાપરાયણા ।
ઢુણ્ઢિવિઘ્નેશજનની ઢક્કાહસ્તા ઢિલિવ્રજા ॥ ૬૪॥

નિત્યજ્ઞાના નિરુપમા નિર્ગુણા નર્મદા નદી ।
ત્રિગુણા ત્રિપદા તન્ત્રી તુલસીતરુણાતરુઃ ॥ ૬૫॥

ત્રિવિક્રમપદાક્રાન્તા તુરીયપદગામિની ।
તરુણાદિત્યસઙ્કાશા તામસી તુહિના તુરા ॥ ૬૬॥

ત્રિકાલજ્ઞાનસમ્પન્ના ત્રિવેણી ચ ત્રિલોચના ।
ત્રિશક્તિસ્ત્રિપુરા તુઙ્ગા તુરઙ્ગવદના તથા ॥ ૬૭॥

તિમિઙ્ગિલગિલા તીવ્રા ત્રિસ્રોતા તામસાદિની ।
તન્ત્રમન્ત્રવિશેષજ્ઞા તનુમધ્યા ત્રિવિષ્ટપા ॥ ૬૮॥

ત્રિસન્ધ્યા ત્રિસ્તની તોષાસંસ્થા તાલપ્રતાપિની ।
તાટઙ્કિની તુષારાભા તુહિનાચલવાસિની ॥ ૬૯॥

તન્તુજાલસમાયુક્તા તારહારાવલિપ્રિયા ।
તિલહોમપ્રિયા તીર્થા તમાલકુસુમાકૃતિઃ ॥ ૭૦॥

તારકા ત્રિયુતા તન્વી ત્રિશઙ્કુપરિવારિતા ।
તલોદરી તિલાભૂષા તાટઙ્કપ્રિયવાહિની ॥ ૭૧॥

ત્રિજટા તિત્તિરી તૃષ્ણા ત્રિવિધા તરુણાકૃતિઃ ।
તપ્તકાઞ્ચનસઙ્કાશા તપ્તકાઞ્ચનભૂષણા ॥ ૭૨॥

ત્રૈયમ્બકા ત્રિવર્ગા ચ ત્રિકાલજ્ઞાનદાયિની ।
તર્પણા તૃપ્તિદા તૃપ્તા તામસી તુમ્બુરુસ્તુતા ॥ ૭૩॥

તાર્ક્ષ્યસ્થા ત્રિગુણાકારા ત્રિભઙ્ગી તનુવલ્લરિઃ ।
થાત્કારી થારવા થાન્તા દોહિની દીનવત્સલા ॥ ૭૪॥

દાનવાન્તકરી દુર્ગા દુર્ગાસુરનિબર્હિણી ।
દેવરીતિર્દિવારાત્રિર્દ્રૌપદી દુન્દુભિસ્વના ॥ ૭૫॥

દેવયાની દુરાવાસા દારિદ્ર્યોદ્ભેદિની દિવા ।
દામોદરપ્રિયા દીપ્તા દિગ્વાસા દિગ્વિમોહિની ॥ ૭૬॥

દણ્ડકારણ્યનિલયા દણ્ડિની દેવપૂજિતા ।
દેવવન્દ્યા દિવિષદા દ્વેષિણી દાનવાકૃતિઃ ॥ ૭૭॥

દીનાનાથસ્તુતા દીક્ષા દૈવતાદિસ્વરૂપિણી ।
ધાત્રી ધનુર્ધરા ધેનુર્ધારિણી ધર્મચારિણી ॥ ૭૮॥

ધરન્ધરા ધરાધારા ધનદા ધાન્યદોહિની ।
ધર્મશીલા ધનાધ્યક્ષા ધનુર્વેદવિશારદા ॥ ૭૯॥

ધૃતિર્ધન્યા ધૃતપદા ધર્મરાજપ્રિયા ધ્રુવા ।
ધૂમાવતી ધૂમકેશી ધર્મશાસ્ત્રપ્રકાશિની ॥ ૮૦॥

નન્દા નન્દપ્રિયા નિદ્રા નૃનુતા નન્દનાત્મિકા ।
નર્મદા નલિની નીલા નીલકણ્ઠસમાશ્રયા ॥ ૮૧॥

નારાયણપ્રિયા નિત્યા નિર્મલા નિર્ગુણા નિધિઃ ।
નિરાધારા નિરુપમા નિત્યશુદ્ધા નિરઞ્જના ॥ ૮૨॥

નાદબિન્દુકલાતીતા નાદબિન્દુકલાત્મિકા ।
નૃસિંહિની નગધરા નૃપનાગવિભૂષિતા ॥ ૮૩॥

નરકક્લેશશમની નારાયણપદોદ્ભવા ।
નિરવદ્યા નિરાકારા નારદપ્રિયકારિણી ॥ ૮૪॥

નાનાજ્યોતિઃસમાખ્યાતા નિધિદા નિર્મલાત્મિકા ।
નવસૂત્રધરા નીતિર્નિરુપદ્રવકારિણી ॥ ૮૫॥

નન્દજા નવરત્નાઢ્યા નૈમિષારણ્યવાસિની ।
નવનીતપ્રિયા નારી નીલજીમૂતનિઃસ્વના ॥ ૮૬॥

નિમેષિણી નદીરૂપા નીલગ્રીવા નિશીશ્વરી ।
નામાવલિર્નિશુમ્ભઘ્ની નાગલોકનિવાસિની ॥ ૮૭॥

નવજામ્બૂનદપ્રખ્યા નાગલોકાધિદેવતા ।
નૂપુરાક્રાન્તચરણા નરચિત્તપ્રમોદિની ॥ ૮૮॥

નિમગ્નારક્તનયના નિર્ઘાતસમનિઃસ્વના ।
નન્દનોદ્યાનનિલયા નિર્વ્યૂહોપરિચારિણી ॥ ૮૯॥

પાર્વતી પરમોદારા પરબ્રહ્માત્મિકા પરા ।
પઞ્ચકોશવિનિર્મુક્તા પઞ્ચપાતકનાશિની ॥ ૯૦॥

પરચિત્તવિધાનજ્ઞા પઞ્ચિકા પઞ્ચરૂપિણી ।
પૂર્ણિમા પરમા પ્રીતિઃ પરતેજઃ પ્રકાશિની ॥ ૯૧॥

પુરાણી પૌરુષી પુણ્યા પુણ્ડરીકનિભેક્ષણા ।
પાતાલતલનિર્મગ્ના પ્રીતા પ્રીતિવિવર્ધિની ॥ ૯૨॥

પાવની પાદસહિતા પેશલા પવનાશિની ।

પ્રજાપતિઃ પરિશ્રાન્તા પર્વતસ્તનમણ્ડલા ॥ ૯૩॥

પદ્મપ્રિયા પદ્મસંસ્થા પદ્માક્ષી પદ્મસમ્ભવા ।
પદ્મપત્રા પદ્મપદા પદ્મિની પ્રિયભાષિણી ॥ ૯૪॥

પશુપાશવિનિર્મુક્તા પુરન્ધ્રી પુરવાસિની ।
પુષ્કલા પુરુષા પર્વા પારિજાતસુમપ્રિયા ॥ ૯૫॥

પતિવ્રતા પવિત્રાઙ્ગી પુષ્પહાસપરાયણા ।
પ્રજ્ઞાવતીસુતા પૌત્રી પુત્રપૂજ્યા પયસ્વિની ॥ ૯૬॥

પટ્ટિપાશધરા પઙ્ક્તિઃ પિતૃલોકપ્રદાયિની ।
પુરાણી પુણ્યશીલા ચ પ્રણતાર્તિવિનાશિની ॥ ૯૭॥

પ્રદ્યુમ્નજનની પુષ્ટા પિતામહપરિગ્રહા ।
પુણ્ડરીકપુરાવાસા પુણ્ડરીકસમાનના ॥ ૯૮॥

પૃથુજઙ્ઘા પૃથુભુજા પૃથુપાદા પૃથૂદરી ।
પ્રવાલશોભા પિઙ્ગાક્ષી પીતવાસાઃ પ્રચાપલા ॥ ૯૯॥

પ્રસવા પુષ્ટિદા પુણ્યા પ્રતિષ્ઠા પ્રણવાગતિઃ ।
પઞ્ચવર્ણા પઞ્ચવાણી પઞ્ચિકા પઞ્જરસ્થિતા ॥ ૧૦૦॥

પરમાયા પરજ્યોતિઃ પરપ્રીતિઃ પરાગતિઃ ।
પરાકાષ્ઠા પરેશાની પાવની પાવકદ્યુતિઃ ॥ ૧૦૧॥

પુણ્યભદ્રા પરિચ્છેદ્યા પુષ્પહાસા પૃથૂદરી ।
પીતાઙ્ગી પીતવસના પીતશય્યા પિશાચિની ॥ ૧૦૨॥

પીતક્રિયા પિશાચઘ્ની પાટલાક્ષી પટુક્રિયા ।
પઞ્ચભક્ષપ્રિયાચારા પૂતનાપ્રાણઘાતિની ॥ ૧૦૩॥

પુન્નાગવનમધ્યસ્થા પુણ્યતીર્થનિષેવિતા ।
પઞ્ચાઙ્ગી ચ પરાશક્તિઃ પરમાહ્લાદકારિણી ॥ ૧૦૪॥

પુષ્પકાણ્ડસ્થિતા પૂષા પોષિતાખિલવિષ્ટપા ।
પાનપ્રિયા પઞ્ચશિખા પન્નગોપરિશાયિની ॥ ૧૦૫॥

પઞ્ચમાત્રાત્મિકા પૃથ્વી પથિકા પૃથુદોહિની ।
પુરાણન્યાયમીમાંસા પાટલી પુષ્પગન્ધિની ॥ ૧૦૬॥

પુણ્યપ્રજા પારદાત્રી પરમાર્ગૈકગોચરા ।
પ્રવાલશોભા પૂર્ણાશા પ્રણવા પલ્લવોદરી ॥ ૧૦૭॥

ફલિની ફલદા ફલ્ગુઃ ફૂત્કારી ફલકાકૃતિઃ ।
ફણીન્દ્રભોગશયના ફણિમણ્ડલમણ્ડિતા ॥ ૧૦૮॥

બાલબાલા બહુમતા બાલાતપનિભાંશુકા ।
બલભદ્રપ્રિયા વન્દ્યા વડવા બુદ્ધિસંસ્તુતા ॥ ૧૧૨॥

બન્દીદેવી બિલવતી બડિશઘ્ની બલિપ્રિયા ।
બાન્ધવી બોધિતા બુદ્ધિર્બન્ધૂકકુસુમપ્રિયા ॥ ૧૧૦॥

બાલભાનુપ્રભાકારા બ્રાહ્મી બ્રાહ્મણદેવતા ।
બૃહસ્પતિસ્તુતા વૃન્દા વૃન્દાવનવિહારિણી ॥ ૧૧૧॥

બાલાકિની બિલાહારા બિલવાસા બહૂદકા ।
બહુનેત્રા બહુપદા બહુકર્ણાવતંસિકા ॥ ૧૧૨॥

બહુબાહુયુતા બીજરૂપિણી બહુરૂપિણી ।
બિન્દુનાદકલાતીતા બિન્દુનાદસ્વરૂપિણી ॥ ૧૧૩॥

બદ્ધગોધાઙ્ગુલિત્રાણા બદર્યાશ્રમવાસિની ।
બૃન્દારકા બૃહત્સ્કન્ધા બૃહતી બાણપાતિની ॥ ૧૧૪॥

વૃન્દાધ્યક્ષા બહુનુતા વનિતા બહુવિક્રમા ।
બદ્ધપદ્માસનાસીના બિલ્વપત્રતલસ્થિતા ॥ ૧૧૫॥

બોધિદ્રુમનિજાવાસા બડિસ્થા બિન્દુદર્પણા ।
બાલા બાણાસનવતી વડવાનલવેગિની ॥ ૧૧૬॥

બ્રહ્માણ્ડબહિરન્તઃસ્થા બ્રહ્મકઙ્કણસૂત્રિણી ।
ભવાની ભીષણવતી ભાવિની ભયહારિણી ॥ ૧૧૭॥

ભદ્રકાલી ભુજઙ્ગાક્ષી ભારતી ભારતાશયા ।
ભૈરવી ભીષણાકારા ભૂતિદા ભૂતિમાલિની ॥ ૧૧૮॥

ભામિની ભોગનિરતા ભદ્રદા ભૂરિવિક્રમા ।
ભૂતવાસા ભૃગુલતા ભાર્ગવી ભૂસુરાર્ચિતા ॥ ૧૧૯॥

ભાગીરથી ભોગવતી ભવનસ્થા ભિષગ્વરા ।
ભામિની ભોગિની ભાષા ભવાની ભૂરિદક્ષિણા ॥ ૧૨૦॥

ભર્ગાત્મિકા ભીમવતી ભવબન્ધવિમોચિની ।
ભજનીયા ભૂતધાત્રીરઞ્જિતા ભુવનેશ્વરી ॥ ૧૨૧॥

ભુજઙ્ગવલયા ભીમા ભેરુણ્ડા ભાગધેયિની ।
માતા માયા મધુમતી મધુજિહ્વા મધુપ્રિયા ॥ ૧૨૨॥

મહાદેવી મહાભાગા માલિની મીનલોચના ।
માયાતીતા મધુમતી મધુમાંસા મધુદ્રવા ॥ ૧૨૩॥

માનવી મધુસમ્ભૂતા મિથિલાપુરવાસિની ।
મધુકૈટભસંહર્ત્રી મેદિની મેઘમાલિની ॥ ૧૨૪॥

મન્દોદરી મહામાયા મૈથિલી મસૃણપ્રિયા ।
મહાલક્ષ્મીર્મહાકાલી મહાકન્યા મહેશ્વરી ॥ ૧૨૫॥

માહેન્દ્રી મેરુતનયા મન્દારકુસુમાર્ચિતા ।
મઞ્જુમઞ્જીરચરણા મોક્ષદા મઞ્જુભાષિણી ॥ ૧૨૬॥

મધુરદ્રાવિણી મુદ્રા મલયા મલયાન્વિતા ।
મેધા મરકતશ્યામા માગધી મેનકાત્મજા ॥ ૧૨૭॥

મહામારી મહાવીરા મહાશ્યામા મનુસ્તુતા ।
માતૃકા મિહિરાભાસા મુકુન્દપદવિક્રમા ॥ ૧૨૮॥

મૂલાધારસ્થિતા મુગ્ધા મણિપૂરકવાસિની ।
મૃગાક્ષી મહિષારૂઢા મહિષાસુરમર્દિની ॥ ૧૨૯॥

યોગાસના યોગગમ્યા યોગા યૌવનકાશ્રયા ।
યૌવની યુદ્ધમધ્યસ્થા યમુના યુગધારિણી ॥ ૧૩૦॥

યક્ષિણી યોગયુક્તા ચ યક્ષરાજપ્રસૂતિની ।
યાત્રા યાનવિધાનજ્ઞા યદુવંશસમુદ્ભવા ॥ ૧૩૧॥

યકારાદિહકારાન્તા યાજુષી યજ્ઞરૂપિણી ।
યામિની યોગનિરતા યાતુધાનભયઙ્કરી ॥ ૧૩૨॥

રુક્મિણી રમણી રામા રેવતી રેણુકા રતિઃ ।
રૌદ્રી રૌદ્રપ્રિયાકારા રામમાતા રતિપ્રિયા ॥ ૧૩૩॥

રોહિણી રાજ્યદા રેવા રમા રાજીવલોચના ।

રાકેશી રૂપસમ્પન્ના રત્નસિંહાસનસ્થિતા ॥ ૧૩૪॥

રક્તમાલ્યામ્બરધરા રક્તગન્ધાનુલેપના ।
રાજહંસસમારૂઢા રમ્ભા રક્તબલિપ્રિયા ॥ ૧૩૫॥

રમણીયયુગાધારા રાજિતાખિલભૂતલા ।
રુરુચર્મપરીધાના રથિની રત્નમાલિકા ॥ ૧૩૬॥

રોગેશી રોગશમની રાવિણી રોમહર્ષિણી ।
રામચન્દ્રપદાક્રાન્તા રાવણચ્છેદકારિણી ॥ ૧૩૭॥

રત્નવસ્ત્રપરિચ્છન્ના રથસ્થા રુક્મભૂષણા ।
લજ્જાધિદેવતા લોલા લલિતા લિઙ્ગધારિણી ॥ ૧૩૮॥

લક્ષ્મીર્લોલા લુપ્તવિષા લોકિની લોકવિશ્રુતા ।
લજ્જા લમ્બોદરી દેવી લલના લોકધારિણી ॥ ૧૩૯॥

વરદા વન્દિતા વિદ્યા વૈષ્ણવી વિમલાકૃતિઃ ।
વારાહી વિરજા વર્ષા વરલક્ષ્મીર્વિલાસિની ॥ ૧૪૦॥

વિનતા વ્યોમમધ્યસ્થા વારિજાસનસંસ્થિતા ।
વારુણી વેણુસમ્ભૂતા વીતિહોત્રા વિરૂપિણી ॥ ૧૪૧॥

વાયુમણ્ડલમધ્યસ્થા વિષ્ણુરૂપા વિધિપ્રિયા ।
વિષ્ણુપત્ની વિષ્ણુમતી વિશાલાક્ષી વસુન્ધરા ॥ ૧૪૨॥

વામદેવપ્રિયા વેલા વજ્રિણી વસુદોહિની ।
વેદાક્ષરપરીતાઙ્ગી વાજપેયફલપ્રદા ॥ ૧૪૩॥

વાસવી વામજનની વૈકુણ્ઠનિલયા વરા ।
વ્યાસપ્રિયા વર્મધરા વાલ્મીકિપરિસેવિતા ॥ ૧૪૪॥

શાકમ્ભરી શિવા શાન્તા શારદા શરણાગતિઃ ।
શાતોદરી શુભાચારા શુમ્ભાસુરવિમર્દિની ॥ ૧૪૫॥

શોભાવતી શિવાકારા શઙ્કરાર્ધશરીરિણી ।
શોણા શુભાશયા શુભ્રા શિરઃસન્ધાનકારિણી ॥ ૧૪૬॥

શરાવતી શરાનન્દા શરજ્જ્યોત્સ્ના શુભાનના ।
શરભા શૂલિની શુદ્ધા શબરી શુકવાહના ॥ ૧૪૭॥

શ્રીમતી શ્રીધરાનન્દા શ્રવણાનન્દદાયિની ।
શર્વાણી શર્વરીવન્દ્યા ષડ્ભાષા ષડૃતુપ્રિયા ॥ ૧૪૮॥

ષડાધારસ્થિતા દેવી ષણ્મુખપ્રિયકારિણી ।
ષડઙ્ગરૂપસુમતિસુરાસુરનમસ્કૃતા ॥ ૧૪૯॥

સરસ્વતી સદાધારા સર્વમઙ્ગલકારિણી ।
સામગાનપ્રિયા સૂક્ષ્મા સાવિત્રી સામસમ્ભવા ॥ ૧૫૦॥

સર્વાવાસા સદાનન્દા સુસ્તની સાગરામ્બરા ।
સર્વૈશ્વર્યપ્રિયા સિદ્ધિઃ સાધુબન્ધુપરાક્રમા ॥ ૧૫૧॥

સપ્તર્ષિમણ્ડલગતા સોમમણ્ડલવાસિની ।
સર્વજ્ઞા સાન્દ્રકરુણા સમાનાધિકવર્જિતા ॥ ૧૫૨॥

સર્વોત્તુઙ્ગા સઙ્ગહીના સદ્ગુણા સકલેષ્ટદા ।
સરઘા સૂર્યતનયા સુકેશી સોમસંહતિઃ ॥ ૧૫૩॥

હિરણ્યવર્ણા હરિણી હ્રીઙ્કારી હંસવાહિની ।
ક્ષૌમવસ્ત્રપરીતાઙ્ગી ક્ષીરાબ્ધિતનયા ક્ષમા ॥ ૧૫૪॥

ગાયત્રી ચૈવ સાવિત્રી પાર્વતી ચ સરસ્વતી ।
વેદગર્ભા વરારોહા શ્રીગાયત્રી પરામ્બિકા ॥ ૧૫૫॥

ઇતિ સાહસ્રકં નામ્નાં ગાયત્ર્યાશ્ચૈવ નારદ ।
પુણ્યદં સર્વપાપઘ્નં મહાસમ્પત્તિદાયકમ્ ॥ ૧૫૬॥

એવં નામાનિ ગાયત્ર્યાસ્તોષોત્પત્તિકરાણિ હિ ।
અષ્ટમ્યાં ચ વિશેષેણ પઠિતવ્યં દ્વિજૈઃ સહ ॥ ૧૫૭॥

જપં કૃત્વા હોમપૂજાધ્યાનં કૃત્વા વિશેષતઃ ।
યસ્મૈ કસ્મૈ ન દાતવ્યં ગાયત્ર્યાસ્તુ વિશેષતઃ ॥ ૧૫૮॥

સુભક્તાય સુશિષ્યાય વક્તવ્યં ભૂસુરાય વૈ ।
ભ્રષ્ટેભ્યઃ સાધકેભ્યશ્ચ બાન્ધવેભ્યો ન દર્શયેત્ ॥ ૧૫૯॥

યદ્ગૃહે લિખિતં શાસ્ત્રં ભયં તસ્ય ન કસ્યચિત્ ।
ચઞ્ચલાપિ સ્થિરા ભૂત્વા કમલા તત્ર તિષ્ઠતિ ॥ ૧૬૦॥

ઇદં રહસ્યં પરમં ગુહ્યાદ્ગુહ્યતરં મહત્ ।
પુણ્યપ્રદં મનુષ્યાણાં દરિદ્રાણાં નિધિપ્રદમ્ ॥ ૧૬૧॥

મોક્ષપ્રદં મુમુક્ષૂણાં કામિનાં સર્વકામદમ્ ।
રોગાદ્વૈ મુચ્યતે રોગી બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૬૨॥

બ્રહ્મહત્યાસુરાપાનસુવર્ણસ્તેયિનો નરાઃ ।
ગુરુતલ્પગતો વાપિ પાતકાન્મુચ્યતે સકૃત્ ॥ ૧૬૩॥

અસત્પ્રતિગ્રહાચ્ચૈવાભક્ષ્યભક્ષાદ્વિશેષતઃ ।
પાખણ્ડાનૃતમુખ્યેભ્યઃ પઠનાદેવ મુચ્યતે ॥ ૧૬૪॥

ઇદં રહસ્યમમલં મયોક્તં પદ્મજોદ્ભવ ।
બ્રહ્મસાયુજ્યદં નૃણાં સત્યં સત્યં ન સંશયઃ ॥ ૧૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે ગાયત્રીસહસ્રનામસ્તોત્રવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૧૨.૬॥

## ૧૨.૭ સપ્તમોઽધ્યાયઃ । મન્ત્રદીક્ષાવિધિવર્ણનમ્ ।

નારદ ઉવાચ ।
શ્રુતં સહસ્રનામાખ્યં શ્રીગાયત્ર્યાઃ ફલપ્રદમ્ ।
સ્તોત્રં મહોન્નતિકરં મહાભાગ્યકરં પરમ્ ॥ ૧॥

અધુના શ્રોતુમિચ્છામિ દીક્ષાલક્ષણમુત્તમમ્ ।
વિના યેન ન સિધ્યેત દેવીમન્ત્રેઽધિકારિતા ॥ ૨॥

બ્રાહ્મણાનાં ક્ષત્રિયાણાં વિશાં સ્ત્રીણાં તથૈવ ચ ।
સામાન્યવિધિના સર્વં વિસ્તરેણ વદ પ્રભો ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
શૃણુ દીક્ષાં પ્રવક્ષ્યામિ શિષ્યાણાં ભાવિતાત્મનામ્ ।
દેવાગ્નિગુરુપૂજાદાવધિકારો યયા ભવેત્ ॥ ૪॥

દિવ્યં જ્ઞાનં હિ યા દદ્યાત્કુર્યાત્પાપક્ષયં તુ યા ।
સૈવ દીક્ષેતિ સમ્પ્રોક્તા વેદતન્ત્રવિશારદૈઃ ॥ ૫॥

અવશ્યં સા તુ કર્તવ્યા યતો બહુફલા મતા ।
ગુરુશિષ્યાવુભાવત્રાપ્યતિશુદ્ધાવપેક્ષિતૌ ॥ ૬॥

ગુરુસ્તુ વિધિવત્પ્રાતઃ કૃત્યં સર્વં વિધાય ચ ।

સ્નાનસન્ધ્યાદિકં સર્વં યથાવિધિ વિધાય ચ ॥ ૭॥

કમણ્ડલુકરો મૌની ગૃહં યાયાત્સરિત્તટાત્ ।
યાગમણ્ડપમાસાદ્ય વિશેત્તત્રાસને વરે ॥ ૮॥

આચમ્ય પ્રાણાનાયમ્ય ગન્ધપુષ્પવિમિશ્રિતમ્ ।
સપ્તવારાસ્ત્રમન્ત્રેણ જપ્તં વારિ સુસાધયેત્ ॥ ૯॥

વારિણા તેન મતિમાનસ્ત્રમન્ત્રં સમુચ્ચરન્ ।
પ્રોક્ષયેદ્વારમખિલં તતઃ પૂજાં સમાચરેત્ ॥ ૧૦॥

ઊર્ધ્વોદુમ્બરકે દેવં ગણનાથં તથા શ્રિયમ્ ।
સરસ્વતીં નામમન્ત્રૈઃ પૂજયેદ્ગન્ધપુષ્પકૈઃ ॥ ૧૧॥

દ્વારદક્ષિણશાખાયાં ગઙ્ગાં વિઘ્નેશમર્ચયેત્ ।
દ્વારસ્ય વામશાખાયાં ક્ષેત્રપાલં ચ સૂર્યજામ્ ॥ ૧૨॥

દેહલ્યાં પૂજયેદસ્ત્રદેવતામસ્ત્રમન્ત્રતઃ ।
સર્વં દેવીમયં દૃશ્યમિતિ સઞ્ચિન્ત્ય સર્વતઃ ॥ ૧૩॥

દિવ્યાનુત્સારયેદ્વિઘ્નાનસ્ત્રમન્ત્રજપેન તુ ।
અન્તરિક્ષગતાન્વિઘ્નાન્પાદઘાતૈસ્તુ ભૂમિગાન્ ॥ ૧૪
વામશાખાં સ્પૃશન્પશ્ચાત્પ્રવિશેદ્દક્ષિણાઙ્ઘ્રિણા ।
પ્રવિશ્ય કુમ્ભં સંસ્થાપ્ય સામાન્યાર્ઘ્યં વિધાય ચ ॥ ૧૫॥

તેન ચાર્ઘ્યજલેનાપિ નૈરૃત્યાં દિશિ પૂજયેત્ ।
વાસ્તુનાથં પદ્મયોનિં ગન્ધપુષ્પાક્ષતાદિભિઃ ॥ ૧૬॥

તતઃ કુર્યાત્પઞ્ચગવ્યં તેન ચાર્ઘ્યોદકેન ચ ।
તોરણસ્તમ્ભપર્યન્તં પ્રોક્ષયેન્મણ્ડપં ગુરુઃ ॥ ૧૭॥

સર્વં દેવીમયં ચેદં ભાવયેન્મનસા કિલ ।
મૂલમન્ત્રં જપન્ભક્ત્યા પ્રોક્ષણં સ્યાચ્છરણુના ॥ ૧૮॥

શરમન્ત્રં સમુચ્ચાર્ય તાડયેન્મણ્ડપક્ષમામ્ ।
હુમ્મન્ત્રં તુ સમુચ્ચાર્ય કુર્યાદભ્યુક્ષણં તતઃ ॥ ૧૯॥

ધૂપયેદન્તરં ધૂપૈર્વિકિરાન્ વિકિરેત્તતઃ ।
માર્જયેત્તાંસ્તુ માર્જન્યા કુશનિર્મિતયા પુનઃ ॥ ૨૦॥

ઈશાનદિશિ તત્પુઞ્જં કૃત્વા સંસ્થાપયેન્મુને ।

પુણ્યાહવાચનં કૃત્વા દીનાનાથાંશ્ચ તોષયેત્ ॥ ૨૧॥

વિશેન્મૃદ્વાસને પશ્ચાન્નમસ્કૃત્ય ગુરું નિજમ્ ।
પ્રાઙ્મુખો વિધિવદ્ધ્યાત્વા દેયમન્ત્રસ્ય દેવતામ્ ॥ ૨૨॥

ભૂતશુદ્ધ્યાદિકં કૃત્વા પૂર્વોક્તેનૈવ વર્ત્મના ।
ઋષ્યાદિન્યાસકં કુર્યાદ્દેયમન્ત્રસ્ય વૈ મુને ॥ ૨૩॥

ન્યસેન્મુનિં તુ શિરસિ મુખે છન્દઃ સમીરિતમ્ ।
દેવતાં હૃદયામ્ભોજે ગુહ્યે બીજં તુ પાદયોઃ ॥ ૨૪॥

શક્તિં વિન્યસ્ય પશ્ચાત્તુ તાલત્રયરવાત્તતઃ ।
દિગ્બન્ધં કારયેત્પશ્ચાચ્છોટિકાભિસ્ત્રિભિર્નરઃ ॥ ૨૫॥

પ્રાણાયામં તતઃ કૃત્વા મૂલમન્ત્રમનુસ્મરન્ ।
માતૃકાં વિન્યસેદ્દેહે તત્પ્રકારસ્તથોચ્યતે ॥ ૨૬॥

ૐ અં નમ ઇતિ પ્રોચ્ય ન્યસેચ્છિરસિ મન્ત્રવિત્ ।
એવમેવ તુ સર્વેષુ ન્યસેત્સ્થાનેષુ વૈ મુને ॥ ૨૭॥

મૂલમન્ત્રં ષડઙ્ગં ચ ન્યસેદઙ્ગેષુ સત્તમઃ ।
અઙ્ગુષ્ઠાદિષ્વઙ્ગુલીષુ હૃદયાદિષુ ચ ક્રમાત્ ॥ ૨૮॥

નમઃ સ્વાહાવષડ્યુક્તૈર્હુંવૌષટ્ફટ્પદાન્વિતૈઃ ।
પ્રણવાદિયુતૈર્મન્ત્રૈઃ ષડ્ભિરેવ ષડઙ્ગકમ્ ॥ ૨૯॥

વર્ણન્યાસાદિકં પશ્ચાન્મૂલમન્ત્રસ્ય યોજયેત્ ।
સ્થાનેષુ તત્તત્કલ્પોક્તેષ્વિતિ ન્યાસવિધિઃ સ્મૃતઃ ॥ ૩૦॥

તતો નિજે શરીરેઽસ્મિંશ્ચિન્તયેદાસનં શુભમ્ ।
દક્ષાંસે ચ ન્યસેદ્ધર્મં વામાંસે જ્ઞાનમેવ ચ ॥ ૩૧॥

વામોરૌ ચાપિ વૈરાગ્યં દક્ષોરાવથ વિન્યસેત્ ।
ઐશ્વર્યં મુખદેશે તુ મુને ધ્યાયેદધર્મકમ્ ॥ ૩૨॥

વામપાર્શ્વે નાભિદેશે દક્ષપાર્શ્વે તથા પુનઃ ।
નઞાદીશ્ચાપિ જ્ઞાનાદીન્પૂર્વોક્તાનેવ વિન્યસેત્ ॥ ૩૩॥

પાદા ધર્માદયઃ પ્રોક્તાઃ પીઠસ્ય મુનિસત્તમ ।
અધર્માદ્યાસ્તુ ગાત્રાણિ સ્મૃતાનિ મુનિપુઙ્ગવૈઃ ॥ ૩૪॥

મધ્યેઽનન્તં હૃદિ સ્થાને ન્યસેન્મૃદ્વાસને સ્થલે ।
પ્રપઞ્ચપદ્મં વિમલં તસ્મિન્સૂર્યેન્દુપાવકાન્ ॥ ૩૫॥

ન્યસેત્કલાયુતાન્મન્ત્રી સઙ્ક્ષેપાત્તા વદામ્યહમ્ ।
સૂર્યસ્ય દ્વાદશ કલાસ્તા ઇન્દોઃ ષોડશ સ્મૃતાઃ ॥ ૩૬॥

દશ વહ્નેઃ કલાઃ પ્રોક્તાસ્તાભિર્યુક્તાંસ્તુ તાન્સ્મરેત્ ।
સત્ત્વં રજસ્તમશ્ચૈવ ન્યસેત્તેષામથોપરિ ॥ ૩૭॥

આત્માનમન્તરાત્માનં પરમાત્માનમેવ ચ ।
જ્ઞાનાત્માનં ન્યસેદ્વિદ્વાનિત્થં પીઠસ્ય કલ્પના ॥ ૩૮॥

અમુકાસનાય નમ ઇતિ મન્ત્રેણ સાધકઃ ।
આસનં પૂજયિત્વા તુ તસ્મિન્ધ્યાયેત્પરામ્બિકામ્ ॥ ૩૯॥

કલ્પોક્તવિધિના મન્ત્રી દેયમન્ત્રસ્ય દેવતામ્ ।
માનસૈરુપચારૈશ્ચ પૂજયેત્તાં યથાવિધિ ॥ ૪૦॥

મુદ્રાઃ પ્રદર્શયેદ્વિદ્વાન્કલ્પોક્તા મોદકારિકાઃ ।
યાભિર્વિરચિતાભિસ્તુ મોદો દેવ્યાસ્તુ જાયતે ॥ ૪૧॥

શ્રીનારાયણ ઉવાચ ।
તતઃ સ્વવામભાગાગ્રે ષટ્કોણોપરિ વર્તુલમ્ ।
ચતુરસ્રયુતં સમ્યઙ્મધ્યે મણ્ડલમાલિખેત્ ॥ ૪૨॥

મધ્યે ત્રિકોણં સંલિખ્ય શઙ્ખમુદ્રાં પ્રદર્શયેત્ ।
ષડઙ્ગાનિ ચ ષટ્કોણેષ્વર્ચયેત્કુસુમાદિભિઃ ॥ ૪૩॥

અગ્ન્યાદિષુ તુ કોણેષુ ષડઙ્ગાર્ચનમાચરેત્ ।
આધારપાત્રમાદાય શઙ્ખસ્ય મુનિસત્તમ ॥ ૪૪॥

અસ્ત્રમન્ત્રેણ સમ્પ્રોક્ષ્ય સ્થાપયેત્તત્ર મણ્ડલે ।
મં વહ્નિમણ્ડલાયોક્ત્વા તતો દશકલાત્મને ॥ ૪૫॥

અમુકદેવ્યા અર્ઘ્યપાત્રસ્થાનાય નમ ઇત્યપિ ।
મન્ત્રોઽયમુક્તઃ શઙ્ખસ્યાપ્યાધારસ્થાપને બુધૈઃ ॥ ૪૬॥

આધારે પૂર્વમારભ્ય પ્રદક્ષિણક્રમેણ તુ ।
દશ વહ્નિકલાઃ પૂજ્યા વહ્નિમણ્ડલસંસ્થિતાઃ ॥ ૪૭॥

તતો વૈ મૂલમન્ત્રેણ પ્રોક્ષિતં શઙ્ખમુત્તમમ્ ।

સ્થાપયેત્તત્ર ચાધારે મૂલમન્ત્રમનુસ્મરન્ ॥ ૪૮॥

અં સૂર્યમણ્ડલાયોક્ત્વા દ્વાદશાન્તે કલાત્મને ।
અમુકદેવ્યર્ઘ્યપાત્રાય નમ ઇત્યુચ્ચરેત્તતઃ ॥ ૪૯॥

શં શઙ્ખાય પદં પ્રોચ્ય નમ ઇત્યેતદુચ્ચરેત્ ।
પ્રોક્ષયેત્તેન તં શઙ્ખં તસ્મિન્દ્વાદશ પૂજયેત્ ॥ ૫૦॥

સૂર્યસ્ય દ્વાદશ કલાસ્તપન્યાદ્યા યથાક્રમમ્ ।
વિલોમમાતૃકાં પ્રોચ્ય મૂલમન્ત્રં વિલોમકમ્ ॥ ૫૧॥

જલૈરાપૂરયેચ્છઙ્ખં તત્ર ચેન્દોઃ કલાં ન્યસેત્ ।
ૐ સોમમણ્ડલાયોક્ત્વાન્તે ષોડશકલાત્મને ॥ ૫૨॥

અમુકાર્ઘ્યામૃતાયેતિ હૃન્મન્ત્રાન્તો મનુઃ સ્મૃતઃ ।
પૂજયેન્મનુના તેન જલં તુ સૃણિમુદ્રયા ॥ ૫૩॥

તીર્થાન્યાવાહ્ય તત્રૈવાપ્યષ્ટકૃત્વો જપેન્મનુમ્ ।
ષડઙ્ગાનિ જલે ન્યસ્ય હૃદા સમ્પૂજયેદપઃ ॥ ૫૪॥

અષ્ટકૃત્વો જપેન્મૂલં છાદયેન્મત્સ્યમુદ્રયા ।
તતો દક્ષિણદિગ્ભાગે શઙ્ખસ્ય પ્રોક્ષણીં ન્યસેત્ ॥ ૫૫॥

શઙ્ખામ્બુ કિઞ્ચિન્નિક્ષિપ્ય પ્રોક્ષયેત્તેન સર્વતઃ ।
પૂજાદ્રવ્યં નિજાત્માનં વિશુદ્ધં ભાવયેત્તતઃ ॥ ૫૬॥

શ્રીનારાયણાય ઉવાચ ।
તતઃ સ્વપુરતો વેદ્યાં સર્વતોભદ્રમણ્ડલમ્ ।
સંલિખ્ય કર્ણિકામધ્યં પૂરયેચ્છાલિતણ્ડુલૈઃ ॥ ૫૭॥

આસ્તીર્ય દર્ભાંસ્તત્રૈવ ન્યસેત્કૂર્ચં સલક્ષણમ્ ।
આધારશક્તિમારભ્ય પીઠમન્વન્તમર્ચયેત્ ॥ ૫૮॥

નિર્વ્રણં કુમ્ભમાદાયાપ્યસ્ત્રાદ્ભિઃ ક્ષાલિતાન્તરમ્ ।
તન્તુના વેષ્ટયેત્તં તુ ત્રિગુણેનારુણેન ચ ॥ ૫૯॥

નવરત્નોદરં કૂર્ચયુતં ગન્ધાદિપૂજિતમ્ ।
સ્થાપયેત્તત્ર પીઠે તુ તારમન્ત્રેણ દેશિકઃ ॥ ૬૦॥

ઐક્યં કુમ્ભસ્ય પીઠસ્ય ભાવયેત્પૂરયેત્તતઃ ।
માતૃકાં પ્રતિલોમેન જપંસ્તીર્થોદકૈર્મુને ॥ ૬૧॥

મૂલમન્ત્રં ચ સઞ્જપ્ય પૂરયેદ્દેવતાધિયા ।
અશ્વત્થપનસામ્રાણાં કોમલૈર્નવપલ્લવૈઃ ॥ ૬૨॥

છાદયેત્કુમ્ભવદનં ચષકં સફલાક્ષતમ્ ।
સંસ્થાપયેત મતિમાન્ વસ્ત્રયુગ્મેન વેષ્ટયેત્ ॥ ૬૩॥

પ્રાણસ્થાપનમન્ત્રેણ પ્રાણસ્થાપનમાચરેત્ ।
આવાહનાદિમુદ્રાભિર્મોદયેદ્દેવતાં પરામ્ ॥ ૬૪॥

ધ્યાયેત્તાં પરમેશાનીં કલ્પોક્તેન પ્રકારતઃ ।
સ્વાગતં કુશલપ્રશ્નં દેવ્યા અગ્રે સમુચ્ચરેત્ ॥ ૬૫॥

પાદ્યં દદ્યાત્તતોઽપ્યર્ઘ્યં તતશ્ચાચમનીયકમ્ ।
મધુપર્કં ચ સાભ્યઙ્ગં દેવ્યૈ સ્નાનં નિવેદયેત્ ॥ ૬૬॥

વાસસી ચ તતો દદ્યાદ્રક્તે ક્ષૌમે સુનિર્મલે ।
નાનામણિગણાકીર્ણાનાકલ્પાન્કલ્પયેત્તતઃ ॥ ૬૭॥

મનુના પુટિતૈર્વર્ણૈર્માતૃકાયા વિધાનતઃ ।
દેવ્યા અઙ્ગેષુ વિન્યસ્ય ચન્દનાદ્યૈઃ સમર્ચયેત્ ॥ ૬૮॥

ગન્ધઃ કાલાગુરુભવઃ કર્પૂરેણ સમન્વિતઃ ।
કાશ્મીરં ચન્દનં ચાપિ કસ્તૂરીસહિતં મુને ॥ ૬૯॥

કુન્દપુષ્પાદિપુષ્પાણિ પરદેવ્યૈ સમર્પયેત્ ।
ધૂપોઽગુરુપુરુવ્રાતોશીરચન્દનશર્કરાઃ ॥ ૭૦॥

મધુમિશ્રાઃ સ્મૃતા દેવ્યાઃ પ્રિયા ધૂપાત્મના સદા ।
દીપાનનેકાન્દત્ત્વાથ નૈવેદ્યં દર્શયેત્સુધીઃ ॥ ૭૧॥

પ્રતિદ્રવ્યં જલં દદ્યાત્પ્રોક્ષણીસ્થં ન ચાન્યથા ।
તતઃ કુર્યાદઙ્ગપૂજાં કલ્પોક્તાવરણાનિ ચ ॥ ૭૨॥

સાઙ્ગાં દેવીમથાભ્યર્ચ્ય વૈશ્વદેવં તતશ્ચરેત્ ।
દક્ષિણે સ્થણ્ડિલં કૃત્વા તત્રાધાય હુતાશનમ્ ॥ ૭૩॥

મૂર્તિસ્થાં દેવતાં તત્રાવાહ્ય સમ્પૂજ્ય ચ ક્રમાત્ ।
તારવ્યાહૃતિભિર્હુત્વા મૂલમન્ત્રેણ વૈ તતઃ ॥ ૭૪॥

પઞ્ચવિંશતિવારં તુ પાયસેન સસર્પિષા ।

હુનેત્પશ્ચાદ્વ્યાહૃતિભિઃ પુનશ્ચ જુહુયાન્મુને ॥ ૭૫॥

ગન્ધાદ્યૈરર્ચયિત્વા ચ દેવીં પીઠે તુ યોજયેત્ ।
વહ્નિં વિસૃજ્ય હવિષા પરિતો વિકિરેદ્બલિમ્ ॥ ૭૬॥

દેવતાયાઃ પાર્ષદેભ્યો ગન્ધપુષ્પાદિસંયુતાન્ ।
પઞ્ચોપચારાન્દત્ત્વાથ તામ્બૂલં છત્રચામરે ॥ ૭૭॥

દદ્યાદ્દેવ્યૈ તતો મન્ત્રં સહસ્રાવૃત્તિતો જપેત્ ।
જપં સમર્પ્ય ચૈશાન્યાં વિકિરે દિશિ સંસ્થિતે ॥ ૭૮॥

કર્કરીં સ્થાપયેત્તસ્યાં દુર્ગામાવાહ્ય પૂજયેત્ ।
રક્ષ રક્ષેતિ ચોચ્ચાર્ય નાલમુક્તેન વારિણા ॥ ૭૯॥

અસ્ત્રમન્ત્રં જપન્દેશં સેચયેત્તુ પ્રદક્ષિણમ્ ।
કર્કરીં સ્થાપયેત્સ્થાને પૂજયેચ્ચાસ્ત્રદેવતામ્ ॥ ૮૦॥

પશ્ચાદ્ગુરુસ્તુ શિષ્યેણ સહ ભુઞ્જીત વાગ્યતઃ ।
તસ્યાં રાત્રૌ તુ તદ્વેદ્યાં નિદ્રાં કુર્યાત્પ્રયત્નતઃ ॥ ૮૧॥

શ્રીનારાયણ ઉવાચ ।
તતઃ કુણ્ડસ્ય સંસ્કારં સ્થણ્ડિલસ્ય ચ વા મુને ।
પ્રવક્ષ્યામિ સમાસેન યથાવિધિ વિધાનતઃ ॥ ૮૨॥

મૂલમન્ત્રં સમુચ્ચાર્ય વીક્ષયેદસ્ત્રમન્ત્રતઃ ।
પ્રોક્ષયેત્તાડનં કુર્યાત્તેનૈવ કવચેન તુ ॥ ૮૩॥

અભ્યુક્ષણં સમુદ્દિષ્ટં તિસ્રસ્તિસ્રસ્તતઃ પરમ્ ।
પ્રાગગ્રા ઉદગગ્રાશ્ચ લિખેલ્લેખાઃ સમન્તતઃ ॥ ૮૪॥

પ્રણવેન સમભ્યુક્ષ્ય પીઠં દેવ્યાઃ સમર્ચયેત્ ।
આધારશક્તિમારભ્ય પીઠમન્ત્રાવસાનકમ્ ॥ ૮૫॥

તસ્મિન્પીઠે સમાવાહ્ય શિવૌ પરમકારણૌ ।
ગન્ધાદ્યૈરુપચારૈશ્ચ પૂજયેત્તૌ સમાહિતઃ ॥ ૮૬॥

દેવીં ધ્યાયેદૃતુસ્નાતાં સંસક્તાં શઙ્કરેણ તુ ।
કામાતુરાં તયોઃ ક્રીડાં કિઞ્ચિત્કાલં વિભાવયેત્ ॥ ૮૭॥

અથ વહ્નિં સમાદાય પાત્રેણ પુરતો ન્યસેત્ ।
ક્રવ્યાદાંશં પરિત્યજ્ય પૂર્વોક્તૈર્વીક્ષણાદિભિઃ ॥ ૮૮॥

સંસ્કૃત્ય વહ્નિં રં બીજમુચ્ચાર્ય તદનન્તરમ્ ।
ચૈતન્યં યોજયેત્તસ્મિન્પ્રણવેનાભિમન્ત્રયેત્ ॥ ૮૯॥

સપ્તવારં તતો ધેનુમુદ્રાં સન્દર્શયેદ્ગુરુઃ ।
શરેણ રક્ષિતં કૃત્વા તનુત્રેણાવગુણ્ઠયેત્ ॥ ૯૦॥

અર્ચિતં ત્રિઃ પરિભ્રામ્ય પ્રાદક્ષિણ્યેન સત્તમઃ ।
કુણ્ડોપરિ જપંસ્તારં જાનુસ્પૃષ્ટમહીતલઃ ॥ ૯૧॥

શિવબીજધિયા દેવ્યા યોનૌ વહ્નિં વિનિક્ષિપેત્ ।
આચામયેત્તતો દેવં દેવીં ચ જગદમ્બિકામ્ ॥ ૯૨॥

ચિત્પિઙ્ગલ હનદહપચયુગ્મં તતઃ પરમ્ ।
સર્વજ્ઞાજ્ઞાપય સ્વાહા મન્ત્રોઽયં વહ્નિદીપને ॥ ૯૩॥

અગ્નિં પ્રજ્વલિતં વન્દે જાતવેદં હુતાશનમ્ ।
સુવર્ણવર્ણમમલં સમિદ્ધં વિશ્વતોમુખમ્ ॥ ૯૪॥

મન્ત્રેણાનેન તં વહ્નિં સ્તુવીત પરમાદરાત્ ।
તતો ન્યસેદ્વહ્નિમન્ત્રં ષડઙ્ગં દેશિકોત્તમઃ ॥ ૯૫॥

સહસ્રાર્ચિઃ સ્વસ્તિપૂર્ણ ઉત્તિષ્ઠપુરુષઃ સ્મૃતઃ ।
ધૂમવ્યાપી સપ્તજિહ્વો ધનુર્ધર ઇતિ ક્રમાત્ ॥ ૯૬॥

જાતિયુક્તાઃ ષડઙ્ગાઃ સ્યુઃ પૂર્વસ્થાનેષુ વિન્યસેત્ ।
ધ્યાયેદ્વહ્નિં હેમવર્ણં ત્રિનેત્રં પદ્મસંસ્થિતમ્ ॥ ૯૭॥

ઇષ્ટશક્તિસ્વસ્તિકાભીર્ધારકં મઙ્ગલં પરમ્ ।
પરિષિઞ્ચેત્તતઃ કુણ્ડં મેખલોપરિ મન્ત્રવિત્ ॥ ૯૮॥

દર્ભૈઃ પરિસ્તરેત્પશ્ચાત્પરિધીન્વિન્યસેદથ ।
ત્રિકોણવૃત્તષટ્કોણં સાષ્ટપત્રં સભૂપુરમ્ ॥ ૯૯॥

યન્ત્રં વિભાવયેદ્વહ્નેઃ પૂર્વં વા સંલિખેદથ ।
તન્મધ્યે પૂજયેદ્વહ્નિં મન્ત્રેણાનેન વૈ મુને ॥ ૧૦૦॥

વૈશ્વાનર તતો જાતવેદઃ પશ્ચાદિહાવહ ।
લોહિતાક્ષપદં પ્રોક્ત્વા સર્વકર્માણિ સાધય ॥ ૧૦૧॥

વહ્નિજાયાન્તકો મન્ત્રસ્તેન વહ્નિં તુ પૂજયેત્ ।

મધ્યે ષટ્સ્વપિ કોણેષુ હિરણ્યા ગગના તથા ॥ ૧૦૨॥

રક્તા કૃષ્ણા સુપ્રભા ચ બહુરૂપાતિરક્તિકા ।
પૂજયેત્સપ્તજિહ્વાસ્તાઃ કેસરેષ્વઙ્ગપૂજનમ્ ॥ ૧૦૩॥

દલેષુ પૂજયેન્મૂર્તીઃ શક્તિસ્વસ્તિકધારિણી ।
જાતવેદાઃ સપ્તજિહ્વો હવ્યવાહન એવ ચ ॥ ૧૦૪॥

અશ્વોદરજસંજ્ઞોઽન્યઃ પુનર્વૈશ્વાનરાહ્વયઃ ।
કૌમારતેજાઃ સ્યાદ્વિશ્વમુખો દેવમુખઃ સ્મૃતઃ ॥ ૧૦૫॥

તારાગ્નયે પદાદ્યાઃ સ્યુર્નત્યન્તા વહ્નિમૂર્તયઃ ।
લોકપાલાંશ્ચતુર્દિક્ષુ વજ્રાદ્યાયુધસંયુતાન્ ॥ ૧૦૬॥

શ્રીનારાયણ ઉવાચ ।
તતઃ સ્રુક્સ્રુવસંસ્કારાવાજ્યસંસ્કાર એવ ચ ।
કૃત્વા હોમં તતઃ કુર્યાત્સ્રુવેણાદાય વૈ ઘૃતમ્ ॥ ૧૦૭॥

દક્ષિણાદ્ઘૃતભાગાત્તુ વહ્નેર્દક્ષિણલોચને ।
જુહુયાદગ્નયે સ્વાહેત્યેવં વૈ વામતોઽન્યતઃ ॥ ૧૦૮॥

સોમાય સ્વાહેતિ મધ્યાદ્ઘૃતમાદાય સત્તમ ।
અગ્નીષોમાભ્યાં સ્વાહેતિ મધ્યનેત્રે હુનેત્તતઃ ॥ ૧૧૨॥

પુનર્દક્ષિણભાગાત્તુ ઘૃતમાદાય વૈ મુખે ।
અગ્નયે સ્વિષ્ટકૃત્સ્વાહેત્યનેનૈવ હુનેત્તતઃ ॥ ૧૧૦॥

સતારાભિર્વ્યાહૃતિભિર્જુહુયાદથ સાધકઃ ।
જુહુયાદગ્નિમન્ત્રેણ ત્રિવારં તુ તતઃ પરમ્ ॥ ૧૧૧॥

તતસ્તુ પ્રણવેનૈવાપ્યષ્ટાવષ્ટૌ ઘૃતાહુતીઃ ।
ગર્ભાધાનાદિસંસ્કારકૃતે તુ જુહુયાન્મુને ॥ ૧૧૨॥

ગર્ભાધાનં પુંસવનં સીમન્તોન્નયનં તતઃ ।
જાતકર્મ નામકર્માપ્યુપનિષ્ક્રમણં તથા ॥ ૧૧૩॥

અન્નાશનં તથા ચૂડા વ્રતબન્ધસ્તથૈવ ચ ।
મહાનામ્ન્યં વ્રતં પશ્ચાત્તથૌપનિષદં વ્રતમ્ ॥ ૧૧૪॥

ગોદાનોદ્વાહકૌ પ્રોક્તાઃ સંસ્કારાઃ શ્રુતિચોદિતાઃ ।
તતઃ શિવં પાર્વતીં ચ પૂજયિત્વા વિસર્જયેત્ ॥ ૧૧૫॥

જુહુયાત્પઞ્ચ સમિધો વહ્નિમુદ્દિશ્ય સાધકઃ ।
પશ્ચાદાવરણાનાં ચાપ્યેકૈકામાહુતિં હુનેત્ ॥ ૧૧૬॥

ઘૃતં સ્રુચિ સમાદાય ચતુર્વારં સ્રુવેણ ચ ।
પિધાય તાં તુ તેનૈવ મુને તિષ્ઠન્નિજાસને ॥ ૧૧૭॥

વૌષડન્તેન મનુના વહ્નેસ્તુ જુહુયાત્તતઃ ।
મહાગણેશમન્ત્રેણ જુહુયાદાહુતીર્દશ ॥ ૧૧૮॥

વહ્નૌ પીઠં સમભ્યર્ચ્ય દેયમન્ત્રસ્ય દેવતામ્ ।
વહ્નૌ ધ્યાત્વા તુ તદ્વક્ત્રે પઞ્ચવિંશતિસઙ્ખ્યયા ॥ ૧૧૯॥

મૂલમન્ત્રેણ જુહુયાદ્વક્ત્રૈકીકરણાય ચ ।
વહ્નિદેવતયોરૈક્યં ભાવયન્નાત્મના સહ ॥ ૧૨૦॥

એકીભૂતં ભાવયેત્તુ તતસ્તુ સાધકોત્તમઃ ।
ષડઙ્ગં દેવતાનાં ચ જુહુયાદાહુતીઃ પૃથક્ ॥ ૧૨૧॥

એકાદશૈવ જુહુયાદાહુતીર્મુનિસત્તમ ।
એતેન નાડીસન્ધાનં વહ્નિદેવતયોર્મુને ॥ ૧૨૨॥

એકૈકક્રમયોગેનાપ્યાવૃત્તીનાં તથૈવ ચ ।
એકૈકક્રમયોગેન ઘૃતેન જુહુયાન્મુને ॥ ૧૨૩॥

તતઃ કલ્પોક્તદ્રવ્યૈસ્તુ જુહુયાદથવા તિલૈઃ ।
દેવતામૂલમન્ત્રેણ ગજાન્તકસહસ્રકમ્ ॥ ૧૨૪॥

એવં હુત્વા તતો દેવીં સન્તુષ્ટાં ભાવયેન્મુને ।
તથૈવાવૃતિદેવીશ્ચ વહ્ન્યાદ્યા દેવતા અપિ ॥ ૧૨૫॥

તતઃ શિષ્યં ચ સુસ્નાતં કૃતસન્ધ્યાદિકક્રિયમ્ ।
વસ્ત્રદ્વયયુતં સ્વર્ણાભરણેન સમન્વિતમ્ ॥ ૧૨૬॥

કમણ્ડલુકરં શુદ્ધં કુણ્ડસ્યાન્તિકમાનયેત્ ।
નમસ્કૃત્ય તતઃ શિષ્યો ગુરૂનથ સભાસદઃ ॥ ૧૨૭॥

કુલદેવં નમસ્કૃત્ય વિશેત્તત્રાથ વિષ્ટરે ।
ગુરુસ્તતસ્તુ તં શિષ્યં કૃપાદૃષ્ટ્યા વિલોકયેત્ ॥ ૧૨૮॥

તચ્ચૈતન્યં નિજે દેહે ભાવયેત્સઙ્ગતં ત્વિતિ ।

તતઃ શિષ્યતનુસ્થાનામધ્વનાં પરિશોધનમ્ ॥ ૧૨૯॥

કુર્યાત્તુ હોમતો વિદ્વાન્દિવ્યદૃષ્ટ્યવલોકનાત્ ।
યેન જાયેત શુદ્ધાત્મા યોગ્યો દેવાદ્યનુગ્રહે ॥ ૧૩૦॥

શ્રીનારાયણ ઉવાચ ।
તનૌ ધ્યાયેત્તુ શિષ્યસ્ય ષડધ્વનઃ ક્રમેણ તુ ।
પાદયોસ્તુ કલાધ્વાનમન્ધૌ તત્ત્વાધ્વકં પુનઃ ॥ ૧૩૧॥

નાભૌ તુ ભુવનાધ્વાનં વર્ણાધ્વાનં તથા હૃદિ ।
પદાધ્વાનં તથા ભાલે મન્ત્રાધ્વાનં તુ મૂર્ધનિ ॥ ૧૩૨॥

શિષ્યં સ્પૃશંસ્તુ કૂર્ચેન તિલૈરાજ્યપરિપ્લુતૈઃ ।
શોધયામ્યમુમધ્વાનં સ્વાહેતિ મનુમુચ્ચરન્ ॥ ૧૩૩॥

તારાઢ્યં જુહુયાદષ્ટવારં પ્રત્યધ્વમેવ હિ ।
ષડધ્વનસ્તતસ્તાંસ્તુ લીનાન્ બ્રહ્મણિ ભાવયેત્ ॥ ૧૩૪॥

પુનરુત્પાદયેત્તસ્માત્સૃષ્ટિમાર્ગેણ વૈ ગુરુઃ ।
આત્મસ્થિતં તચ્ચૈતન્યં પુનઃ શિષ્યે તુ યોજયેત્ ॥ ૧૩૫॥

પૂર્ણાહુતિં તતો હુત્વા દેવતાં કલશે નયેત્ ।
પુનર્વ્યાહૃતિભિર્હુત્વા વહ્નેરઙ્ગાહુતીસ્તથા ॥ ૧૩૬॥

એકૈકશો ગુરુર્દત્ત્વા વિસૃજેદ્વહ્નિમાત્મનિ ।
તતઃ શિષ્યસ્ય નેત્રે તુ બધ્નીયાદ્વાસસા ગુરુઃ ॥ ૧૩૭॥

નેત્રમન્ત્રેણ તં શિષ્યં કુણ્ડતો મણ્ડલં નયેત્ ।
પુષ્પાઞ્જલિં મુખ્યદેવ્યાં કારયેચ્છિષ્યહસ્તતઃ ॥ ૧૩૮॥

નેત્રબન્ધં નિરાકૃત્ય વેશયેત્કુશવિષ્ટરે ।
ભૂતશુદ્ધિં શિષ્યદેહે કુર્યાત્પ્રોક્તેન વર્ત્મના ॥ ૧૩૯॥

મન્ત્રોદિતાંસ્તથા ન્યાસાન્કૃત્વા શિષ્યતનૌ તતઃ ।
મણ્ડલે વેશયેચ્છિષ્યમન્યસ્મિન્કુમ્ભસંસ્થિતાન્ ॥ ૧૪૦॥

પલ્લવાચ્છિષ્યશિરસિ વિન્યસેન્માતૃકાં જપેત્ ।
કલશસ્થજલૈઃ શિષ્યં સ્નાપયેદ્દેવતાત્મકૈઃ ॥ ૧૪૧॥

વર્ધનીજલસેકં ચ કુર્યાદ્રક્ષાર્થમઞ્જસા ।
તતઃ શિષ્યઃ સમુત્થાય વાસસી પરિધાય ચ ॥ ૧૪૨॥

કૃતભસ્માવલેપશ્ચ સંવિશેદ્ગુરુસન્નિધૌ ।
તતો ગુરુઃ સ્વકીયાત્તુ હૃદયાન્નિર્ગતાં શિવામ્ ॥ ૧૪૩॥

પ્રવિષ્ટાં શિષ્યહૃદયે ભાવયેત્કરુણાનિધિઃ ।
પૂજયેદ્ગન્ધપુષ્પાદ્યૈરૈક્યં વૈ ભાવયંસ્તયોઃ ॥ ૧૪૪॥

તતસ્ત્રિંશો દક્ષકર્ણે શિષ્યસ્યોપદિશેદ્ગુરુઃ ।
મહામન્ત્રં મહાદેવ્યાઃ સ્વહસ્તં શિરસિ ન્યસન્ ॥ ૧૪૫॥

અષ્ટોત્તરશતં મન્ત્રં શિષ્યોઽપિ પ્રજપેન્મુને ।
દણ્ડવત્પ્રણમેદ્ભૂમૌ તં ગુરું દેવતાત્મકમ્ ॥ ૧૪૬॥

સર્વસ્વમર્પયેત્તસ્મૈ યાવજ્જીવમનન્યધીઃ ।
ઋત્વિગ્ભ્યો દક્ષિણાં દત્ત્વા બ્રાહ્મણાંશ્ચાપિ ભોજયેત્ ॥ ૧૪૭॥

સુવાસિનીઃ કુમારીશ્ચ બટુકાંશ્ચૈવ સર્વશઃ ।
દીનાનાથાન્દરિદ્રાંશ્ચ વિત્તશાઠ્યવિવર્જિતઃ ॥ ૧૪૮॥

કૃતાર્થતાં સ્વસ્ય બુદ્ધ્વા નિત્યમારાધયેન્મનુમ્ ।
ઇતિ તે કથિતઃ સમ્યગ્દીક્ષાવિધિરનુત્તમઃ ॥ ૧૪૯॥

વિમૃશ્યૈતદશેષેણ ભજ દેવીપદામ્બુજમ્ ।
નાન્યસ્તુ પરમો ધર્મો બ્રાહ્મણસ્યાત્ર વિદ્યતે ॥ ૧૫૦॥

વૈદિકઃ સ્વસ્વગૃહ્યોક્તક્રમેણોપદિશેન્મનુમ્ ।
તાન્ત્રિકસ્તન્ત્રરીત્યા તુ સ્થિતિરેષા સનાતની ॥ ૧૫૧॥

તત્તદુક્તપ્રયોગાંસ્તે તે તે કુર્યુર્ન ચાન્યથા ।
શ્રીનારાયણ ઉવાચ ।
ઇતિ સર્વં મયાખ્યાતં યત્પૃષ્ટં નારદ ત્વયા ॥ ૧૫૨॥

અતઃ પરં પરામ્બાયા ભજ નિત્યં પદામ્બુજમ્ ।
નિત્યમારાધ્ય તચ્ચાહં નિર્વૃતિં પરમાં ગતઃ ॥ ૧૫૩॥

વ્યાસ ઉવાચ ।
ઇતિ રાજન્નારદાય પ્રોક્ત્વા સર્વમનુત્તમમ્ ।
સમાધિમીલિતાક્ષસ્તુ દધ્યૌ દેવીપદામ્બુજમ્ ॥ ૧૫૪॥

નારાયણસ્તુ ભગવાન્ મુનિવર્યશિખામણિઃ ।

નારદોઽપિ તતો નત્વા ગુરું નારાયણં પરમ્ ।
જગામ સદ્યસ્તપસે દેવીદર્શનલાલસઃ ॥ ૧૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે મન્ત્રદીક્ષાવિધિવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૧૨.૭॥

## ૧૨.૮ અષ્ટમોઽધ્યાયઃ । પરાશક્તેરાવિર્ભાવવર્ણનમ્ ।

જનમેજય ઉવાચ ।
ભગવન્સર્વધર્મજ્ઞ સર્વશાસ્ત્રવતાંવર ।
દ્વિજાતીનાં તુ સર્વેષાં શક્ત્યુપાસ્તિઃ શ્રુતીરિતા ॥ ૧॥

સન્ધ્યાકાલત્રયેઽન્યસ્મિન્ કાલે નિત્યતયા વિભો ।
તાં વિહાય દ્વિજાઃ કસ્માદ્ગૃહ્ણીયુશ્ચાન્યદેવતાઃ ॥ ૨॥

દૃશ્યન્તે વૈષ્ણવાઃ કેચિદ્ગાણપત્યાસ્તથાપરે ।
કાપાલિકાશ્ચીનમાર્ગરતા વલ્કલધારિણઃ ॥ ૩॥

દિગમ્બરાસ્તથા બૌદ્ધાશ્ચાર્વાકા એવમાદયઃ ।
દૃશ્યન્તે બહવો લોકે વેદશ્રદ્ધાવિવર્જિતાઃ ॥ ૪॥

કિમત્ર કારણં બ્રહ્મંસ્તદ્ભવાન્ વક્તુમર્હતિ ।
બુદ્ધિમન્તઃ પણ્ડિતાશ્ચ નાનાતર્કવિચક્ષણાઃ ॥ ૫॥

અપિ સન્ત્યેવ વેદેષુ શ્રદ્ધયા તુ વિવર્જિતાઃ ।
ન હિ કશ્ચિત્સ્વકલ્યાણં બુદ્ધ્યા હાતુમિહેચ્છતિ ॥ ૬॥

કિમત્ર કારણં તસ્માદ્વદ વેદવિદાંવર ।
મણિદ્વીપસ્ય મહિમા વર્ણિતો ભવતા પુરા ॥ ૭॥

કીદૃક્ તદસ્તિ યદ્દેવ્યાઃ પરં સ્થાનં મહત્તરમ્ ।
તચ્ચાપિ વદ ભક્તાય શ્રદ્ધાનાય મેઽનઘ ॥ ૮॥

પ્રસન્નાસ્તુ વદન્ત્યેવ ગુરવો ગુહ્યમપ્યુત ।
સૂત ઉવાચ ।
ઇતિ રાજ્ઞો વચઃ શ્રુત્વા ભગવાન્ બાદરાયણઃ ॥ ૯॥

નિજગાદ તતઃ સર્વં ક્રમેણૈવ મુનીશ્વરાઃ ।
યચ્છ્રુત્વા તુ દ્વિજાતીનાં વેદશ્રદ્ધા વિવર્ધતે ॥ ૧૦॥

વ્યાસ ઉવાચ ।
સમ્યક્પૃષ્ટં ત્વયા રાજન્ સમયે સમયોચિતમ્ ।
વુદ્ધિમાનસિ વેદેષુ શ્રદ્ધાવાંશ્ચૈવ લક્ષ્યસે ॥ ૧૧॥

પૂર્વં મદોદ્ધતા દૈત્યા દેવૈર્યુદ્ધં તુ ચક્રિરે ।
શતવર્ષં મહારાજ મહાવિસ્મયકારકમ્ ॥ ૧૨॥

નાનાશસ્ત્રપ્રહરણં નાનામાયાવિચિત્રિતમ્ ।
જગત્ક્ષયકરં નૂનં તેષાં યુદ્ધમભૂન્નૃપ ॥ ૧૩॥

પરાશક્તિકૃપાવેશાદ્દેવૈર્દૈત્યા જિતા યુધિ ।
ભુવં સ્વર્ગં પરિત્યજ્ય ગતાઃ પાતાલવેશ્મનિ ॥ ૧૪॥

તતઃ પ્રહર્ષિતા દેવાઃ સ્વપરાક્રમવર્ણનમ્ ।
ચક્રુઃ પરસ્પરં મોહાત્સાભિમાનાઃ સમન્તતઃ ॥ ૧૫॥

જયોઽસ્માકં કુતો ન સ્યાદસ્માકં મહિમા યતઃ ।
સર્વોત્તરઃ કુત્ર દૈત્યાઃ પામરા નિષ્પરાક્રમાઃ ॥ ૧૬॥

સૃષ્ટિસ્થિતિક્ષયકરા વયં સર્વે યશસ્વિનઃ ।
અસ્મદગ્રે પામરાણાં દૈત્યાનાં ચૈવ કા કથા ॥ ૧૭॥

પરાશક્તિપ્રભાવં તે ન જ્ઞાત્વા મોહમાગતાઃ ।
તેષામનુગ્રહં કર્તું તદૈવ જગદમ્બિકા ॥ ૧૮॥

પ્રાદુરાસીત્કૃપાપૂર્ણા યક્ષરૂપેણ ભૂમિપ ।
કોટિસૂર્યપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ॥ ૧૯॥

વિદ્યુત્કોટિસમાનાભં હસ્તપાદાદિવર્જિતમ્ ।
અદૃષ્ટપૂર્વં તદૃષ્ટ્વા તેજઃ પરમસુન્દરમ્ ॥ ૨૦॥

સવિસ્મયાસ્તદા પ્રોચુઃ કિમિદં કિમિદં ત્વિતિ ।
દૈત્યાનાં ચેષ્ટિતં કિં વા માયા કાપિ મહીયસી ॥ ૨૧॥

કેનચિન્નિર્મિતા વાથ દેવાનાં સ્મયકારિણી ।
સમ્ભૂય તે તદા સર્વે વિચારં ચક્રુરુત્તમમ્ ॥ ૨૨॥

યક્ષસ્ય નિકટે ગત્વા પ્રષ્ટવ્યં કસ્ત્વમિત્યપિ ।
બલાબલં તતો જ્ઞાત્વા કર્તવ્યા તુ પ્રતિક્રિયા ॥ ૨૩॥

તતો વહ્નિં સમાહૂય પ્રોવાચેન્દ્રઃ સુરાધિપઃ ।

ગચ્છ વહ્ને ત્વમસ્માકં યતોઽસિ મુખમુત્તમમ્ ॥ ૨૪॥

તતો ગત્વા તુ જાનીહિ કિમિદં યક્ષમિત્યપિ ।
સહસ્રાક્ષવચઃ શ્રુત્વા સ્વપરાક્રમગર્ભિતમ્ ॥ ૨૫॥

વેગાત્સ નિર્ગતો વહ્નિર્યયૌ યક્ષસ્ય સન્નિધૌ ।
તદા પ્રોવાચ યક્ષસ્તં ત્વં કોઽસીતિ હુતાશનમ્ ॥ ૨૬॥

વીર્યં ચ ત્વયિ કિં યત્તદ્વદ સર્વં મમાગ્રતઃ ।
અગ્નિરસ્મિ તથા જાતવેદા અસ્મીતિ સોઽબ્રવીત્ ॥ ૨૭॥

સર્વસ્ય દહને શક્તિર્મયિ વિશ્વસ્ય તિષ્ઠતિ ।
તદા યક્ષં પરં તેજસ્તદગ્રે નિદધૌ તૃણમ્ ॥ ૨૮॥

દહૈનં યદિ તે શક્તિર્વિશ્વસ્ય દહનેઽસ્તિ હિ ।
તદા સર્વબલેનૈવાકરોદ્યત્નં હુતાશનઃ ॥ ૨૯॥

ન શશાક તૃણં દગ્ધું લજ્જિતોઽગાત્સુરાન્પ્રતિ ।
પૃષ્ટે દેવૈસ્તુ વૃત્તાન્તે સર્વં પ્રોવાચ હવ્યભુક્ ॥ ૩૦॥

વૃથાભિમાનો હ્યસ્માકં સર્વેશત્વાદિકે સુરાઃ ।
તતસ્તુ વૃત્રહા વાયું સમાહૂયેદમબ્રવીત્ ॥ ૩૧॥

ત્વયિ પ્રોતં જગત્સર્વં ત્વચ્ચેષ્ટાભિસ્તુ ચેષ્ટિતમ્ ।
ત્વં પ્રાણરૂપઃ સર્વેષાં સર્વશક્તિવિધારકઃ ॥ ૩૨॥

ત્વમેવ ગત્વા જાનીહિ કિમિદં યક્ષમિત્યપિ ।
નાન્યઃ કોઽપિ સમર્થોઽસ્તિ જ્ઞાતું યક્ષં પરં મહઃ ॥ ૩૩॥

સહસ્રાક્ષવચઃ શ્રુત્વા ગુણગૌરવગુમ્ફિતમ્ ।
સાભિમાનો જગામાશુ યત્ર યક્ષં વિરાજતે ॥ ૩૪॥

યક્ષં દૃષ્ટ્વા તતો વાયું પ્રોવાચ મૃદુભાષયા ।
કોઽસિ ત્વં ત્વયિ કા શક્તિર્વદ સર્વં મમાગ્રતઃ ॥ ૩૫॥

તતો યક્ષવચઃ શ્રુત્વા ગર્વેણ મરુદબ્રવીત્ ।
માતરિશ્વાહમસ્મીતિ વાયુરસ્મીતિ ચાબ્રવીત્ ॥ ૩૬॥

વીર્યં તુ મયિ સર્વસ્ય ચાલને ગ્રહણેઽસ્તિ હિ ।
મચ્ચેષ્ટયા જગત્સર્વં સર્વવ્યાપારવદ્ભવેત્ ॥ ૩૭॥

ઇતિ શ્રુત્વા વાયુવાણીં નિજગાદ પરં મહઃ ।
તૃણમેતત્તવાગ્રે યત્તચ્ચાલય યથેપ્સિતમ્ ॥ ૩૮॥

નોચેદ્ગર્વં વિહાયૈનં લજ્જિતો ગચ્છ વાસવમ્ ।
શ્રુત્વા યક્ષવચો વાયુઃ સર્વશક્તિસમન્વિતઃ ॥ ૩૯॥

ઉદ્યોગમકરોત્તચ્ચ સ્વસ્થાનાન્ન ચચાલ હ ।
લજ્જિતોઽગાદ્દેવપાર્શ્વે હિત્વા ગર્વં સ ચાનિલઃ ॥ ૪૦॥

વૃત્તાન્તમવદત્સર્વં ગર્વનિર્વાપકારણમ્ ।
નૈતંજ્ઞાતું સમર્થાઃ સ્મ મિથ્યાગર્વાભિમાનિનઃ ॥ ૪૧॥

અલૌકિકં ભાતિ યક્ષં તેજઃ પરમદારુણમ્ ।
તતઃ સર્વે સુરગણાઃ સહસ્રાક્ષં સમૂચિરે ॥ ૪૨॥

દેવરાડસિ યસ્માત્ત્વં યક્ષં જાનીહિ તત્ત્વતઃ ।
તત ઇન્દ્રો મહાગર્વાત્તદ્યક્ષં સમુપાદ્રવત્ ॥ ૪૩॥

પ્રાદ્રવચ્ચ પરં તેજો યક્ષરૂપં પરાત્પરમ્ ।
અન્તર્ધાનં તતઃ પ્રાપ તદ્યક્ષં વાસવાગ્રતઃ ॥ ૪૪॥

અતીવ લજ્જિતો જાતો વાસવો દેવરાડપિ ।
યક્ષસમ્ભાષણાભાવાલ્લઘુત્વં પ્રાપ ચેતસિ ॥ ૪૫॥

અતઃ પરં ન ગન્તવ્યં મયા તુ સુરસંસદિ ।
કિં મયા તત્ર વક્તવ્યં સ્વલઘુત્વં સુરાન્પ્રતિ ॥ ૪૬॥

દેહત્યાગો વરસ્તસ્માન્માનો હિ મહતાં ધનમ્ ।
માને નષ્ટે જીવિતં તુ મૃતિતુલ્યં ન સંશયઃ ॥ ૪૭॥

ઇતિ નિશ્ચિત્ય તત્રૈવ ગર્વં હિત્વા સુરેશ્વરઃ ।
ચરિત્રમીદૃશં યસ્ય તમેવ શરણં ગતઃ ॥ ૪૮॥

તસ્મિન્નેવ ક્ષણે જાતા વ્યોમવાણી નભસ્તલે ।
માયાબીજં સહસ્રાક્ષ જપ તેન સુખી ભવ ॥ ૪૯॥

તતો જજાપ પરમં માયાબીજં પરાત્પરમ્ ।
લક્ષવર્ષં નિરાહારો ધ્યાનમીલિતલોચનઃ ॥ ૫૦॥

અકસ્માચ્ચૈત્રમાસીયનવમ્યાં મધ્યગે રવૌ ।
તદેવાવિરભૂત્તેજસ્તસ્મિન્નેવ સ્થલે પુનઃ ॥ ૫૧॥

તેજોમણ્ડલમધ્યે તુ કુમારીં નવયૌવનામ્ ।
ભાસ્વજ્જપાપ્રસૂનાભાં બાલકોટિરવિપ્રભામ્ ॥ ૫૨॥

બાલશીતાંશમુકુટાં વસ્ત્રાન્તર્વ્યઞ્જિતસ્તનીમ્ ।
ચતુર્ભિર્વરહસ્તૈસ્તુ વરપાશાઙ્કુશાભયાન્ ॥ ૫૩॥

દધાનાં રમણીયાઙ્ગીં કોમલાઙ્ગલતાં શિવામ્ ।
ભક્તકલ્પદ્રુમામમ્બાં નાનાભૂષણભૂષિતામ્ ॥ ૫૪॥

ત્રિનેત્રાં મલ્લિકામાલાકબરીજૂટશોભિતામ્ ।
ચતુર્દિક્ષુ ચતુર્વેદૈર્મૂર્તિમદ્ભિરભિષ્ટુતામ્ ॥ ૫૫॥

દન્તચ્છટાભિરભિતઃ પદ્મરાગીકૃતક્ષમામ્ ।
પ્રસન્નસ્મેરવદનાં કોટિકન્દર્પસુન્દરામ્ ॥ ૫૬॥

રક્તામ્બરપરીધાનાં રક્તચન્દનચર્ચિતામ્ ।
ઉમાભિધાનાં પુરતો દેવીં હૈમવતીં શિવામ્ ॥ ૫૭॥

નિર્વ્યાજકરુણામૂર્તિં સર્વકારણકારણામ્ ।
દદર્શ વાસવસ્તત્ર પ્રેમગદ્ગદિતાન્તરઃ ॥ ૫૮॥

પ્રેમાશ્રુપૂર્ણનયનો રોમાઞ્ચિતતનુસ્તતઃ ।
દણ્ડવત્પ્રણનામાથ પાદયોર્જગદીશિતુઃ ॥ ૫૯॥

તુષ્ટાવ વિવિધૈઃ સ્તોત્રૈર્ભક્તિસન્નતકન્ધરઃ ।
ઉવાચ પરમપ્રીતઃ કિમિદં યક્ષમિત્યપિ ॥ ૬૦॥

પ્રાદુર્ભૂતં ચ કસ્માત્તદ્વદ સર્વં સુશોભને ।
ઇતિ તસ્ય વચઃ શ્રુત્વા પ્રોવાચ કરુણાર્ણવા ॥ ૬૧॥

રૂપં મદીયં બ્રહ્મૈતત્સર્વકારણકારણમ્ ।
માયાધિષ્ઠાનભૂતં તુ સર્વસાક્ષિ નિરામયમ્ ॥ ૬૨॥

સર્વે વેદા યત્પદમામનન્તિ
તપાંસિ સર્વાણિ ચ યદ્વદન્તિ ।
યદિચ્છન્તો બ્રહ્મચર્યં ચરન્તિ
તત્તે પદં સઙ્ગ્રહેણ બ્રવીમિ ॥ ૬૩॥

ઓમિત્યેકાક્ષરં બ્રહ્મ તદેવાહુશ્ચ હ્રીંમયમ્ ।

દ્વે બીજે મમ મન્ત્રૌ સ્તો મુખ્યત્વેન સુરોત્તમ ॥ ૬૪॥

ભાગદ્વયવતી યસ્માત્સૃજામિ સકલં જગત્ ।
તત્રૈકભાગઃ સમ્પ્રોક્તઃ સચ્ચિદાનન્દનામકઃ ॥ ૬૫॥

માયાપ્રકૃતિસંજ્ઞસ્તુ દ્વિતીયો ભાગ ઈરિતઃ ।
સા ચ માયા પરા શક્તિઃ શક્તિમત્યહમીશ્વરી ॥ ૬૬॥

ચન્દ્રસ્ય ચન્દ્રિકેવેયં મમાભિન્નત્વમાગતા ।
સામ્યાવસ્થાત્મિકા ચૈષા માયા મમ સુરોત્તમ ॥ ૬૭॥

પ્રલયે સર્વજગતો મદભિન્નૈવ તિષ્ઠતિ ।
પ્રાણિકર્મપરીપાકવશતઃ પુનરેવ હિ ॥ ૬૮॥

રૂપં તદેવમવ્યક્તં વ્યક્તીભાવમુપૈતિ ચ ।
અન્તર્મુખા તુ યાવસ્થા સા માયેત્યભિધીયતે ॥ ૬૯॥

બહિર્મુખા તુ યા માયા તમઃશબ્દેન સોચ્યતે ।
બહિર્મુખાત્તમોરૂપાજ્જાયતે સત્ત્વસમ્ભવઃ ॥ ૭૦॥

રજોગુણસ્તદૈવ સ્યાત્સર્ગાદૌ સુરસત્તમ ।
ગુણત્રયાત્મકાઃ પ્રોક્તા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૭૧॥

રજોગુણાધિકો બ્રહ્મા વિષ્ણુઃ સત્ત્વાધિકો ભવેત્ ।
તમોગુણાધિકો રુદ્રઃ સર્વકારણરૂપધૃક્ ॥ ૭૨॥

સ્થૂલદેહો ભવેદ્બ્રહ્મા લિઙ્ગદેહો હરિઃ સ્મૃતઃ ।
રુદ્રસ્તુ કારણો દેહસ્તુરીયા ત્વહમેવ હિ ॥ ૭૩॥

સામ્યાવસ્થા તુ યા પ્રોક્તા સર્વાન્તર્યામિરૂપિણી ।
અત ઊર્ધ્વં પરં બ્રહ્મ મદ્રૂપં રૂપવર્જિતમ્ ॥ ૭૪॥

નિર્ગુણં સગુણં ચેતિ દ્વિધા મદ્રૂપમુચ્યતે ।
નિર્ગુણં માયયા હીનં સગુણં માયયા યુતમ્ ॥ ૭૫॥

સાહં સર્વં જગત્સૃષ્ટ્વા તદન્તઃ સમ્પ્રવિશ્ય ચ ।
પ્રેરયામ્યનિશં જીવં યથાકર્મ યથાશ્રુતમ્ ॥ ૭૬॥

સૃષ્ટિસ્થિતિતિરોધાને પ્રેરયામ્યહમેવ હિ ।
બ્રહ્માણં ચ તથા વિષ્ણું રુદ્રં વૈ કારણાત્મકમ્ ॥ ૭૭॥

મદ્ભયાદ્વાતિ પવનો ભીત્યા સૂર્યશ્ચ ગચ્છતિ ।
ઇન્દ્રાગ્નિમૃત્યવસ્તદ્વત્સાહં સર્વોત્તમા સ્મૃતા ॥ ૭૮॥

મત્પ્રસાદાદ્ભવદ્ભિસ્તુ જયો લબ્ધોઽસ્તિ સર્વથા ।
યુષ્માનહં નર્તયામિ કાષ્ઠપુત્તલિકોપમાન્ ॥ ૭૯॥

કદાચિદ્દેવવિજયં દૈત્યાનાં વિજયં ક્વચિત્ ।
સ્વતન્ત્રા સ્વેચ્છયા સર્વં કુર્વે કર્માનુરોધતઃ ॥ ૮૦॥

તાં માં સર્વાત્મિકાં યૂયં વિસ્મૃત્ય નિજગર્વતઃ ।
અહઙ્કારાવૃતાત્માનો મોહમાપ્તા દુરન્તકમ્ ॥ ૮૧॥

અનુગ્રહં તતઃ કર્તું યુષ્મદ્દેહાદનુત્તમમ્ ।
નિઃસૃતં સહસા તેજો મદીયં યક્ષમિત્યપિ ॥ ૮૨॥

અતઃ પરં સર્વભાવૈર્હિત્વા ગર્વં તુ દેહજમ્ ।
મામેવ શરણં યાત સચ્ચિદાનન્દરૂપિણીમ્ ॥ ૮૩॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા ચ મહાદેવી મૂલપ્રકૃતિરીશ્વરી ।
અન્તર્ધાનં ગતા સદ્યો ભક્ત્યા દેવૈરભિષ્ટુતા ॥ ૮૪॥

તતઃ સર્વે સ્વગર્વં તુ વિહાય પદપઙ્કજમ્ ।
સમ્યગારાધયામાસુર્ભગવત્યાઃ પરાત્પરમ્ ॥ ૮૫॥

ત્રિસન્ધ્યં સર્વદા સર્વે ગાયત્રીજપતત્પરાઃ ।
યજ્ઞભાગાદિભિઃ સર્વે દેવીં નિત્યં સિષેવિરે ॥ ૮૬॥

એવં સત્યયુગે સર્વે ગાયત્રીજપતત્પરાઃ ।
તારહૃલ્લેખયોશ્ચાપિ જપે નિષ્ણાતમાનસાઃ ॥ ૮૭॥

ન વિષ્ણૂપાસના નિત્યા વેદેનોક્તા તુ કુત્રચિત્ ।
ન વિષ્ણુદીક્ષા નિત્યાસ્તિ શિવસ્યાપિ તથૈવ ચ ॥ ૮૮॥

ગાયત્ર્યુપાસના નિત્યા સર્વવેદૈઃ સમીરિતા ।
યયા વિના ત્વધઃપાતો બ્રાહ્મણસ્યાસ્તિ સર્વથા ॥ ૮૯॥

તાવતા કૃતકૃત્યત્વં નાન્યાપેક્ષા દ્વિજસ્ય હિ ।
ગાયત્રીમાત્રનિષ્ણાતો દ્વિજો મોક્ષમવાપ્નુયાત્ ॥ ૯૦॥

કુર્યાદન્યન્ન વા કુર્યાદિતિ પ્રાહ મનુઃ સ્વયમ્ ।

વિહાય તાં તુ ગાયત્રીં વિષ્ણૂપાસ્તિપરાયણઃ ॥ ૯૧॥

શિવોપાસ્તિરતો વિપ્રો નરકં યાતિ સર્વથા ।
તસ્માદાદ્યયુગે રાજન્ ગાયત્રીજપતત્પરાઃ ।
દેવીપદામ્બુજરતા આસન્સર્વે દ્વિજોત્તમાઃ ॥ ૯૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે પરાશક્તેરાવિર્ભાવવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૧૨.૮॥

## ૧૨.૯ નવમોઽધ્યાયઃ । બ્રાહ્મણાદીનાં ગાયત્રીભિન્નાન્યદેવોપાસનાશ્રદ્ધાહેતુનિરૂપણમ્ ।

વ્યાસ ઉવાચ ।
કદાચિદથ કાલે તુ દશપઞ્ચસમા વિભો ।
પ્રાણિનાં કર્મવશતો ન વવર્ષ શતક્રતુઃ ॥ ૧॥

અનાવૃષ્ટ્યાતિદુર્ભિક્ષમભવત્ક્ષયકારકમ્ ।
ગહે ગૃહે શવાનાં તુ સઙ્ખ્યા કર્તું ન શક્યતે ॥ ૨॥

કેચિદશ્વાન્વરાહાન્વા ભક્ષયન્તિ ક્ષુધાર્દિતાઃ ।
શવાનિ ચ મનુષ્યાણાં ભક્ષયન્ત્યપરે જનાઃ ॥ ૩॥

બાલકં બાલજનની સ્ત્રિયં પુરુષ એવ ચ ।
ભક્ષિતું ચલિતાઃ સર્વે ક્ષુધયા પીડિતા નરાઃ ॥ ૪॥

બ્રાહ્મણા બહવસ્તત્ર વિચારં ચક્રુરુત્તમમ્ ।
તપોધનો ગૌતમોઽસ્તિ સ નઃ ખેદં હરિષ્યતિ ॥ ૫॥

સર્વૈર્મિલિત્વા ગન્તવ્યં ગૌતમસ્યાશ્રમેઽધુના ।
ગાયત્રીજપસંસક્તગૌતમસ્યાશ્રમેઽધુના ॥ ૬॥

સુભિક્ષં શ્રૂયતે તત્ર પ્રાણિનો બહવો ગતાઃ ।
એવં વિમૃશ્ય ભૂદેવાઃ સાગ્નિહોત્રાઃ કુટુમ્બિનઃ ॥ ૭॥

સગોધનાઃ સદાસાશ્ચ ગૌતમસ્યાશ્રમં યયુઃ ।
પૂર્વદેશાદ્યયુઃ કેચિત્કેચિદ્દક્ષિણદેશતઃ ॥ ૮॥

પાશ્ચાત્યા ઔત્તરાહાશ્ચ નાનાદિગ્ભ્યઃ સમાયયુઃ ।
દૃષ્ટ્વા સમાજં વિપ્રાણાં પ્રણનામ સ ગૌતમઃ ॥ ૯॥

આસનાદ્યુપચારૈશ્ચ પૂજયામાસ વાડવાન્ ।

ચકાર કુશલપ્રશ્નં તતશ્ચાગમકારણમ્ ॥ ૧૦॥

તે સર્વે સ્વસ્વવૃત્તાન્તં કથયામાસુરુત્સ્મયાઃ ।
દૃષ્ટ્વા તાન્દુઃખિતાન્વિપ્રાનભયં દત્તવાન્મુનિઃ ॥ ૧૧॥

યુષ્માકમેતત્સદનં ભવદ્દાસોઽસ્મિ સર્વથા ।
કા ચિન્તા ભવતાં વિપ્રા મયિ દાસે વિરાજતિ ॥ ૧૨॥

ધન્યોઽહમસ્મિન્સમયે યૂયં સર્વે તપોધનાઃ ।
યેષાં દર્શનમાત્રેણ દુષ્કૃતં સુકૃતાયતે ॥ ૧૩॥

તે સર્વે પાદરજસા પાવયન્તિ ગૃહં મમ ।
કો મદન્યો ભવેદ્ધન્યો ભવતાં સમનુગ્રહાત્ ॥ ૧૪॥

સ્થેયં સર્વૈઃ સુખેનૈવ સન્ધ્યાજપપરાયણૈઃ ।
વ્યાસ ઉવાચ ।
ઇતિ સર્વાન્સમાશ્વાસ્ય ગૌતમો મુનિરાટ્ તતઃ ॥ ૧૫॥

ગાયત્રીં પ્રાર્થયામાસ ભક્તિસન્નતકન્ધરઃ ।
નમો દેવિ મહાવિદ્યે વેદમાતઃ પરાત્પરે ॥ ૧૬॥

વ્યાહૃત્યાદિમહામન્ત્રરૂપે પ્રણવરૂપિણિ ।
સામ્યાવસ્થાત્મિકે માતર્નમો હ્રીઙ્કારરૂપિણિ ॥ ૧૭॥

સ્વાહાસ્વધાસ્વરૂપે ત્વાં નમામિ સકલાર્થદામ્ ।
ભક્તકલ્પલતાં દેવીમવસ્થાત્રયસાક્ષિણીમ્ ॥ ૧૮॥

તુર્યાતીતસ્વરૂપાં ચ સચ્ચિદાનન્દરૂપિણીમ્ ।
સર્વવેદાન્તસંવેદ્યાં સૂર્યમણ્ડલવાસિનીમ્ ॥ ૧૯॥

પ્રાતર્બાલાં રક્તવર્ણાં મધ્યાહ્ને યુવતીં પરામ્ ।
સાયાહ્ને કૃષ્ણવર્ણાં તાં વૃદ્ધાં નિત્યં નમામ્યહમ્ ॥ ૨૦॥

સર્વભૂતારણે દેવિ ક્ષમસ્વ પરમેશ્વરિ ।
ઇતિ સ્તુતા જગન્માતા પ્રત્યક્ષં દર્શનં દદૌ ॥ ૨૧॥

પૂર્ણપાત્રં દદૌ તસ્મૈ યેન સ્યાત્સર્વપોષણમ્ ।
ઉવાચ મુનિમમ્બા સા યં યં કામં ત્વમિચ્છસિ ॥ ૨૨॥

તસ્ય પૂર્તિકરં પાત્રં મયા દત્તં ભવિષ્યતિ ।
ઇત્યુક્ત્વાન્તર્દધે દેવી ગાયત્રી પરમા કલા ॥ ૨૩॥

અન્નાનાં રાશયસ્તસ્માન્નિર્ગતાઃ પર્વતોપમાઃ ।
ષડ્રસા વિવિધા રાજંસ્તૃણાનિ વિવિધાનિ ચ ॥ ૨૪॥

ભૂષણાનિ ચ દિવ્યાનિ ક્ષૌમાનિ વસનાનિ ચ ।
યજ્ઞાનાં ચ સમારમ્ભાઃ પાત્રાણિ વિવિધાનિ ચ ॥ ૨૫॥

યદ્યદિષ્ટમભૂદ્રાજન્ મુનેસ્તસ્ય મહાત્મનઃ ।
તત્સર્વં નિર્ગતં તસ્માદ્ગાયત્રીપૂર્ણપાત્રતઃ ॥ ૨૬॥

અથાહૂય મુનીન્સર્વાન્મુનિરાડ્ ગૌતમસ્તદા ।
ધનં ધાન્યં ભૂષણાનિ વસનાનિ દદૌ મુદા ॥ ૨૭॥

ગોમહિષ્યાદિપશવો નિર્ગતાઃ પૂર્ણપાત્રતઃ ।
નિર્ગતાન્યજ્ઞસમ્ભારાન્સ્રુક્સ્રુવપ્રભૃતીન્દદૌ ॥ ૨૮॥

તે સર્વે મિલિતા યજ્ઞાંશ્ચક્રિરે મુનિવાક્યતઃ ।
સ્થાનં તદેવ ભૂયિષ્ઠમભવત્સ્વર્ગસન્નિભમ્ ॥ ૨૯॥

યત્કિઞ્ચિત્ ત્રિષુ લોકેષુ સુન્દરં વસ્તુ દૃશ્યતે ।
તત્સર્વં તત્ર નિષ્પન્નં ગાયત્રીદત્તપાત્રતઃ ॥ ૩૦॥

દેવાઙ્ગનાસમા દારાઃ શોભન્તે ભૂષણાદિભિઃ ।
મુનયો દેવસદૃશા વસ્ત્રચન્દનભૂષણૈઃ ॥ ૩૧॥

નિત્યોત્સવઃ પ્રવવૃતે મુનેરાશ્રમમણ્ડલે ।
ન રોગાદિભયં કિઞ્ચિન્ન ચ દૈત્યભયં ક્વચિત્ ॥ ૩૨॥

સ મુનેરાશ્રમો જાતઃ સમન્તાચ્છતયોજનઃ ।
અન્યે ચ પ્રાણિનો યેઽપિ તેઽપિ તત્ર સમાગતાઃ ॥ ૩૩॥

તાંશ્ચ સર્વાન્પુપોષાયં દત્ત્વાભયમથાત્મવાન્ ।
નાનાવિધૈર્મહાયજ્ઞૈર્વિધિવત્કલ્પિતૈઃ સુરાઃ ॥ ૩૪॥

સન્તોષં પરમં પ્રાપુર્મુનેશ્ચૈવ જગુર્યશઃ ।
સભાયાં વૃત્રહા ભૂયો જગૌ શ્લોકં મહાયશાઃ ॥ ૩૫॥

અહો અયં નઃ કિલ કલ્પપાદપો
મનોરથાન્પૂરયતિ પ્રતિષ્ઠિતઃ ।
નોચેદકાણ્ડે ક્વ હવિર્વપા વા

સુદુર્લભા યત્ર તુ જીવનાશા ॥ ૩૬॥

ઇત્થં દ્વાદશવર્ષાણિ પુપોષ મુનિપુઙ્ગવાન્ ।
પુત્રવન્મુનિરાડ્ ગર્વગન્ધેન પરિવર્જિતઃ ॥ ૩૭॥

ગાયત્ર્યાઃ પરમં સ્થાનં ચકાર મુનિસત્તમઃ ।
યત્ર સર્વૈર્મુનિવરૈઃ પૂજ્યતે જગદમ્બિકા ॥ ૩૮॥

ત્રિકાલં પરયા ભક્ત્યા પુરશ્ચરણકર્મભિઃ ।
અદ્યાપિ યત્ર દેવી સા પ્રાતર્બાલા તુ દૃશ્યતે ॥ ૩૯॥

મધ્યાહ્ને યુવતી વૃદ્ધા સાયઙ્કાલે તુ દૃશ્યતે ।
તત્રૈકદા સમાયાતો નારદો મુનિસત્તમઃ ॥ ૪૦॥

રણયન્મહતીં ગાયન્ગાયત્ર્યાઃ પરમાન્ગુણાન્ ।
નિષસાદ સભામધ્યે મુનીનાં ભાવિતાત્મનામ્ ॥ ૪૧॥

ગૌતમાદિભિરત્યુચ્ચૈઃ પૂજિતઃ શાન્તમાનસઃ ।
કથાશ્ચકાર વિવિધા યશસો ગૌતમસ્ય ચ ॥ ૪૨॥

બ્રહ્મર્ષે દેવસદસિ દેવરાટ્ તવ યદ્યશઃ ।
જગૌ બહુવિધં સ્વચ્છં મુનિપોષણજં પરમ્ ॥ ૪૩॥

શ્રુત્વા શચીપતેર્વાણીં ત્વાં દ્રષ્ટુમહમાગતઃ ।
ધન્યોઽસિ ત્વં મુનિશ્રેષ્ઠ જગદમ્બાપ્રસાદતઃ ॥ ૪૪॥

ઇત્યુક્ત્વા મુનિવર્યં તં ગાયત્રીસદનં યયૌ ।
દદર્શ જગદમ્બાં તાં પ્રેમોત્ફુલ્લવિલોચનઃ ॥ ૪૫॥

તુષ્ટાવ વિધિવદ્દેવીં જગામ ત્રિદિવં પુનઃ ।
અથ તત્ર સ્થિતા યે તે બ્રાહ્મણા મુનિપોષિતાઃ ॥ ૪૬॥

ઉત્કર્ષં તુ મુનેઃ શ્રુત્વાસૂયયા ખેદમાગતાઃ ।
યથાસ્ય ન યશો ભૂયાત્કર્તવ્યં સર્વથૈવ હિ ॥ ૪૭॥

કાલે સમાગતે પશ્ચાદિતિ સર્વૈસ્તુ નિશ્ચિતમ્ ।
તતઃ કાલેન કિયતાપ્યભૂદ્વૃષ્ટિર્ધરાતલે ॥ ૪૮॥

સુભિક્ષમભવત્સર્વદેશેષુ નૃપસત્તમ ।
શ્રુત્વા વાર્તાં સુભિક્ષસ્ય મિલિતાઃ સર્વવાડવાઃ ॥ ૪૯॥

ગૌતમં શમ્ભુમુદ્યોગં હા હા રાજન્ પ્રચક્રિરે ।
ધન્યૌ તેષાં ચ પિતરૌ યયોરુત્પત્તિરીદૃશી ॥ ૫૦॥

કાલસ્ય મહિમા રાજન્ વક્તું કેન હિ શક્યતે ।
ગૌર્નિર્મિતા માયયૈકા મુમૂર્ષુર્જરતી નૃપ ॥ ૫૧॥

જગામ સા ચ શાલાયાં હોમકાલે મુનેસ્તદા ।
હુંહુંશબ્દૈર્વારિતા સા પ્રાણાંસ્તત્યાજ તત્ક્ષણે ॥ ૫૨॥

ગૌર્હતાનેન દુષ્ટેનેત્યેવં તે ચુક્રુશુર્દ્વિજાઃ ।
હોમં સમાપ્ય મુનિરાડ્ વિસ્મયં પરમં ગતઃ ॥ ૫૩॥

સમાધિમીલિતાક્ષઃ સંશ્ચિન્તયામાસ કારણમ્ ।
કૃતં સર્વં દ્વિજૈરેતદિતિ જ્ઞાત્વા તદૈવ સઃ ॥ ૫૪॥

દધાર કોપં પરમં પ્રલયે રુદ્રકોપવત્ ।
શશાપ ચ ઋષીન્સર્વાન્કોપસંરક્તલોચનઃ ॥ ૫૫॥

વેદમાતરિ ગાયત્ર્યાં તદ્ધ્યાને તન્મનોર્જપે ।
ભવતાનુન્મુખા યૂયં સર્વથા બ્રાહ્મણાધમાઃ ॥ ૫૬॥

વેદે વેદોક્તયજ્ઞેષુ તદ્વાર્તાસુ તથૈવ ચ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૫૭॥

શિવે શિવસ્ય મન્ત્રે ચ શિવશાસ્ત્રે તથૈવ ચ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૫૮॥

મૂલપ્રકૃત્યાઃ શ્રીદેવ્યાસ્તદ્ધ્યાને તત્કથાસુ ચ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૫૯॥

દેવીમન્ત્રે તથા દેવ્યાઃ સ્થાનેઽનુષ્ઠાનકર્મણિ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૦॥

દેવ્યુત્સવદિદૃક્ષાયાં દેવીનામાનુકીર્તને ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૧॥

દેવીભક્તસ્ય સાન્નિધ્યે દેવીભક્તાર્ચને તથા ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૨॥

શિવોત્સવદિદૃક્ષાયાં શિવભક્તસ્ય પૂજને ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૩॥

રુદ્રાક્ષં બિલ્વપત્રે ચ તથા શુદ્ધે ચ ભસ્મનિ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૪॥

શ્રૌતસ્માર્તસદાચારે જ્ઞાનમાર્ગે તથૈવ ચ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૫॥

અદ્વૈતજ્ઞાનનિષ્ઠાયાં શાન્તિદાન્ત્યાદિસાધને ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૬॥

નિત્યકર્માદ્યનુષ્ઠાનેઽપ્યગ્નિહોત્રાદિસાધને ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૭॥

સ્વાધ્યાયાધ્યયને ચૈવ તથા પ્રવચનેઽપિ ચ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૮॥

ગોદાનાદિષુ દાનેષુ પિતૃશ્રાદ્ધેષુ ચૈવ હિ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૬૯॥

કૃચ્છ્રચાન્દ્રાયણે ચૈવ પ્રાયશ્ચિત્તે તથૈવ ચ ।
ભવતાનુન્મુખા યૂયં સર્વદા બ્રાહ્મણાધમાઃ ॥ ૭૦॥

શ્રીદેવીભિન્નદેવેષુ શ્રદ્ધાભક્તિસમન્વિતાઃ ।
શઙ્ખચક્રાદ્યઙ્કિતાશ્ચ ભવત બ્રાહ્મણાધમાઃ ॥ ૭૧॥

કાપાલિકમતાસક્તા બૌદ્ધશાસ્ત્રરતાઃ સદા ।
પાખણ્ડાચારનિરતા ભવત બ્રાહ્મણાધમાઃ ॥ ૭૨॥

પિતૃમાતૃસુતાભ્રાતૃકન્યાવિક્રયિણસ્તથા ।
ભાર્યાવિક્રયિણસ્તદ્વદ્ભવત બ્રાહ્મણાધમાઃ ॥ ૭૩॥

વેદવિક્રયિણસ્તદ્વત્તીર્થવિક્રયિણસ્તથા ।
ધર્મવિક્રયિણસ્તદ્વદ્ભવત બ્રાહ્મણાધમાઃ ॥ ૭૪॥

પાઞ્ચરાત્રે કામશાસ્ત્રે તથા કાપાલિકે મતે ।
બૌદ્ધે શ્રદ્ધાયુતા યૂયં ભવત બ્રાહ્મણાધમાઃ ॥ ૭૫॥

માતૃકન્યાગામિનશ્ચ ભગિનીગામિનસ્તથા ।
પરસ્ત્રીલમ્પટાઃ સર્વે ભવત બ્રાહ્મણાધમાઃ ॥ ૭૬॥

યુષ્માકં વંશજાતાશ્ચ સ્ત્રિયશ્ચ પુરુષાસ્તથા ।

મદ્દત્તશાપદગ્ધાસ્તે ભવિષ્યન્તિ ભવત્સમાઃ ॥ ૭૭॥

કિં મયા બહુનોક્તેન મૂલપ્રકૃતિરીશ્વરી ।
ગાયત્રી પરમા ભૂયાદ્યુષ્માસુ ખલુ કોપિતા ॥ ૭૮॥

અન્ધકૂપાદિકુણ્ડેષુ યુષ્માકં સ્યાત્સદા સ્થિતિઃ ।
વ્યાસ ઉવાચ ।
વાગ્દણ્ડમીદૃશં કૃત્વાપ્યુપસ્પૃશ્ય જલં તતઃ ॥ ૭૯॥

જગામ દર્શનાર્થં ચ ગાયત્ર્યાઃ પરમોસ્તુકઃ ।
પ્રણનામ મહાદેવીં સાપિ દેવી પરાત્પરા ॥ ૮૦॥

બ્રાહ્મણાનાં કૃતિં દૃષ્ટ્વા સ્મયં ચિત્તે ચકાર હ ।
અદ્યાપિ તસ્યા વદનં સ્મયયુક્તં ચ દૃશ્યતે ॥ ૮૧॥

ઉવાચ મુનિવર્યં તં સ્મયમાનમુખામ્બુજા ।
ભુજઙ્ગાયાર્પિતં દુગ્ધં વિષાયૈવોપજાયતે ॥ ૮૨॥

શાન્તિં કુરુ મહાભાગ કર્મણો ગતિરીદૃશી ।
ઇતિ દેવીં પ્રણમ્યાથ તતોઽગાત્સ્વાશ્રમં પ્રતિ ॥ ૮૩॥

તતો વિપ્રૈઃ શાપદગ્ધૈર્વિસ્મૃતા વેદરાશયઃ ।
ગાયત્રી વિસ્મૃતા સર્વૈસ્તદદ્ભુતમિવાભવત્ ॥ ૮૪॥

તે સર્વેઽથ મિલિત્વા તુ પશ્ચાત્તાપયુતાસ્તથા ।
પ્રણેમુર્મુનિવર્યં તં દણ્ડવત્પતિતા ભુવિ ॥ ૮૫॥

નોચુઃ કિઞ્ચન વાક્યં તુ લજ્જયાધોમુખાઃ સ્થિતાઃ ।
પ્રસીદેતિ પ્રસીદેતિ પ્રસીદેતિ પુનઃ પુનઃ ॥ ૮૬॥

પ્રાર્થયામાસુરભિતઃ પરિવાર્ય મુનીશ્વરમ્ ।
કરુણાપૂર્ણહૃદયો મુનિસ્તાન્સમુવાચ હ ॥ ૮૭॥

કૃષ્ણાવતારપર્યન્તં કુમ્ભીપાકે ભવેત્સ્થિતિઃ ।
ન મે વાક્યં મૃષા ભૂયાદિતિ જાનીથ સર્વથા ॥ ૮૮॥

તતઃ પરં કલિયુગે ભુવિ જન્મ ભવેદ્ધિ વામ્ ।
મદુક્તં સર્વમેતત્તુ ભવેદેવ ન ચાન્યથા ॥ ૮૯॥

મચ્છાપસ્ય વિમોક્ષાર્થં યુષ્માકં સ્યાદ્યદીષણા ।
તર્હિ સેવ્યં સદા સર્વૈર્ગાયત્રીપદપઙ્કજમ્ ॥ ૯૦॥

વ્યાસ ઉવાચ ।
ઇતિ સર્વાન્વિસૃજ્યાથ ગૌતમો મુનિસત્તમઃ ।
પ્રારબ્ધામિતિ મત્વા તુ ચિત્તે શાન્તિં જગામ હ ॥ ૯૧॥

એતસ્માત્કારણાદ્રાજન્ ગતે કૃષ્ણે તુ ધીમતિ ।
કલૌ યુગે પ્રવૃત્તે તુ કુમ્ભીપાકાત્તુ નિર્ગતાઃ ॥ ૯૨॥

ભુવિ જાતા બ્રાહ્મણાશ્ચ શાપદગ્ધાઃ પુરા તુ યે ।
સન્ધ્યાત્રયવિહીનાશ્ચ ગાયત્રીભક્તિવર્જિતાઃ ॥ ૯૩॥

વેદભક્તિવિહીનાશ્ચ પાખણ્ડમતગામિનઃ ।
અગ્નિહોત્રાદિસત્કર્મસ્વધાસ્વાહાવિવર્જિતાઃ ॥ ૯૪॥

મૂલપ્રકૃતિમવ્યક્તાં નૈવ જાનન્તિ કર્હિચિત્ ।
તપ્તમુદ્રાઙ્કિતાઃ કેચિત્કામાચારરતાઃ પરે ॥ ૯૫॥

કાપાલિકાઃ કૌલિકાશ્ચ બૌદ્ધા જૈનાસ્તથાપરે ।
પણ્ડિતા અપિ તે સર્વે દુરાચારપ્રવર્તકાઃ ॥ ૯૬॥

લમ્પટાઃ પરદારેષુ દુરાચારપરાયણાઃ ।
કુમ્ભીપાકં પુનઃ સર્વે યાસ્યન્તિ નિજકર્મભિઃ ॥ ૯૭॥

તસ્માત્સર્વાત્મના રાજન્ સંસેવ્યા પરમેશ્વરી ।
ન વિષ્ણૂપાસના નિત્યા ન શિવોપાસના તથા ॥ ૯૮॥

નિત્યા ચોપાસના શક્તેર્યાં વિના તુ પતત્યધઃ ।
સર્વમુક્તં સમાસેન યત્પૃષ્ટં તત્ત્વયાનઘ ॥ ૯૯॥

અતઃ પરં મણિદ્વીપવર્ણનં શ‍ૃણુ સુન્દરમ્ ।
યત્પરં સ્થાનમાદ્યાયા ભુવનેશ્યા ભવારણેઃ ॥ ૧૦૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં દ્વાદશસ્કન્ધે બ્રાહ્મણાદીનાં
ગાયત્રીભિન્નાન્યદેવોપાસનાશ્રદ્ધાહેતુનિરૂપણં નામ નવમોઽધ્યાયઃ ॥ ૧૨.૯॥

## ૧૨.૧૦ દશમોઽધ્યાયઃ । મણિદ્વીપવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
બ્રહ્મલોકાદૂર્ધ્વભાગે સર્વલોકોઽસ્તિ યઃ શ્રુતઃ ।
મણિદ્વીપઃ સ એવાસ્તિ યત્ર દેવી વિરાજતે ॥ ૧॥

સર્વસ્માદધિકો યસ્માત્સર્વલોકસ્તતઃ સ્મૃતઃ ।
પુરા પરામ્બયૈવાયં કલ્પિતો મનસેચ્છયા ॥ ૨॥

સર્વાદૌ નિજવાસાર્થં પ્રકૃત્યા મૂલભૂતયા ।
કૈલાસાદધિકો લોકો વૈકુણ્ઠાદપિ ચોત્તમઃ ॥ ૩॥

ગોલોકાદપિ સર્વસ્માત્સર્વલોકોઽધિકઃ સ્મૃતઃ ।
ન તત્સમં ત્રિલોક્યાં તુ સુન્દરં વિદ્યતે ક્વચિત્ ॥ ૪॥

છત્રીભૂતં ત્રિજગતો ભવસન્તાપનાશકમ્ ।
છાયાભૂતં તદેવાસ્તિ બ્રહ્માણ્ડાનાં તુ સત્તમ ॥ ૫॥

બહુયોજનવિસ્તીર્ણો ગમ્ભીરસ્તાવદેવ હિ ।
મણિદ્વીપસ્ય પરિતો વર્તતે તુ સુધોદધિઃ ॥ ૬॥

મરુત્સઙ્ઘટ્ટનોત્કીર્ણતરઙ્ગ શતસઙ્કુલઃ ।
રત્નાચ્છવાલુકાયુક્તો ઝષશઙ્ખસમાકુલઃ ॥ ૭॥

વીચિસઙ્ઘર્ષસઞ્જાતલહરીકણશીતલઃ ।
નાનાધ્વજસમાયુક્તનાનાપોતગતાગતૈઃ ॥ ૮॥

વિરાજમાનઃ પરિતસ્તીરરત્નદ્રુમો મહાન્ ।
તદુત્તરમયોધાતુનિર્મિતો ગગને તતઃ ॥ ૯॥

સપ્તયોજનવિસ્તીર્ણઃ પ્રાકારો વર્તતે મહાન્ ।
નાનાશસ્ત્રપ્રહરણા નાનાયુદ્ધવિશારદાઃ ॥ ૧૦॥

રક્ષકા નિવસન્ત્યત્ર મોદમાનાઃ સમન્તતઃ ।
ચતુર્દ્વારસમાયુક્તો દ્વારપાલશતાન્વિતઃ ॥ ૧૧॥

નાનાગણૈઃ પરિવૃતો દેવીભક્તિયુતૈર્નૃપ ।
દર્શનાર્થં સમાયાન્તિ યે દેવા જગદીશિતુઃ ॥ ૧૨॥

તેષાં ગણા વસન્ત્યત્ર વાહનાનિ ચ તત્ર હિ ।
વિમાનશતસઙ્ઘર્ષઘણ્ટાસ્વનસમાકુલઃ ॥ ૧૩॥

હયહેષાખરાઘાતબધિરીકૃતદિઙ્મુખઃ ।
ગણૈઃ કિલકિલારાવૈર્વેત્રહસ્તૈશ્ચ તાડિતાઃ ॥ ૧૪॥

સેવકા દેવસઙ્ઘાનાં ભ્રાજન્તે તત્ર ભૂમિપ ।
તસ્મિન્કોલાહલે રાજન્ન શબ્દઃ કેનચિત્ક્વચિત્ ॥ ૧૫॥

કસ્યચિચ્છ્રૂયતેઽત્યન્તં નાનાધ્વનિસમાકુલે ।
પદે પદે મિષ્ટવારિપરિપૂર્ણસરાંસિ ચ ॥ ૧૬॥

વાટિકા વિવિધા રાજન્ રત્નદ્રુમવિરાજિતાઃ ।
તદુત્તરં મહાસારધાતુનિર્મિતમણ્ડલઃ ॥ ૧૭॥

સાલોઽપરો મહાનસ્તિ ગગનસ્પર્શિ યચ્છિરઃ ।
તેજસા સ્યાચ્છતગુણઃ પૂર્વસાલાદયં પરઃ ॥ ૧૮॥

ગોપુરદ્વારસહિતો બહુવૃક્ષસમન્વિતઃ ।
યા વૃક્ષજાતયઃ સન્તિ સર્વાસ્તાસ્તત્ર સન્તિ ચ ॥ ૧૯॥

નિરન્તરં પુષ્પયુતાઃ સદા ફલસમન્વિતાઃ ।
નવપલ્લવસંયુક્તાઃ પરસૌરભસઙ્કુલાઃ ॥ ૨૦॥

પનસા બકુલા લોધ્રાઃ કર્ણિકારાશ્ચ શિંશપાઃ ।
દેવદારુકાઞ્ચનારા આમ્રાશ્ચૈવ સુમેરવઃ ॥ ૨૧॥

લિકુચા હિઙ્ગુલાશ્ચૈલા લવઙ્ગાઃ કટ્ફલાસ્તથા ।
પાટલા મુચુકુન્દાશ્ચ ફલિન્યો જઘનેફલાઃ ॥ ૨૨॥

તાલાસ્તમાલાઃ સાલાશ્ચ કઙ્કોલા નાગભદ્રકાઃ ।
પુન્નાગાઃ પીલવઃ સાલ્વકા વૈ કર્પૂરશાખિનઃ ॥ ૨૩॥

અશ્વકર્ણા હસ્તિકર્ણાસ્તાલપર્ણાશ્ચ દાડિમાઃ ।
ગણિકા બન્ધુજીવાશ્ચ જમ્બીરાશ્ચ કુરણ્ડકાઃ ॥ ૨૪॥

ચામ્પેયા બન્ધુજીવાશ્ચ તથા વૈ કનકદ્રુમાઃ ।
કાલાગુરુદ્રુમાશ્ચૈવ તથા ચન્દનપાદપાઃ ॥ ૨૫॥

ખર્જૂરા યૂથિકાસ્તાલપર્ણ્યશ્ચૈવ તથેક્ષવઃ ।
ક્ષીરવૃક્ષાશ્ચ ખદિરાશ્ચિઞ્ચાભલ્લાતકાસ્તથા ॥ ૨૬॥

રુચકાઃ કુટજા વૃક્ષા બિલ્વવૃક્ષાસ્તથૈવ ચ ।

તુલસીનાં વનાન્યેવં મલ્લિકાનાં તથૈવ ચ ॥ ૨૭॥

ઇત્યાદિતરુજાતીનાં વનાન્યુપવનાનિ ચ ।
નાનાવાપીશતૈર્યુક્તાન્યેવં સન્તિ ધરાધિપ ॥ ૨૮॥

કોકિલારાવસંયુક્તા ગુઞ્જદ્ભ્રમરભૂષિતાઃ ।
નિર્યાસસ્રાવિણઃ સર્વે સ્નિગ્ધચ્છાયાસ્તરૂત્તમાઃ ॥ ૨૯॥

નાનાઋતુભવા વૃક્ષા નાનાપક્ષિસમાકુલાઃ ।
નાનારસસ્રાવિણીભિર્નદીભિરતિશોભિતાઃ ॥ ૩૦॥

પારાવતશુકવ્રાતસારિકાપક્ષમારુતૈઃ ।
હંસપક્ષસમુદ્ભૂતાવાતવ્રાતૈશ્ચલદ્દ્રુમમ્ ॥ ૩૧॥

સુગન્ધગ્રાહિપવનપૂરિતં તદ્વનોત્તમમ્ ।
સહિતં હરિણીયૂથૈર્ધાવમાનૈરિતસ્તતઃ ॥ ૩૨॥

નૃત્યદ્બર્હિકદમ્બસ્ય કેકારાવૈઃ સુખપ્રદૈઃ ।
નાદિતં તદ્વનં દિવ્યં મધુસ્રાવિ સમન્તતઃ ॥ ૩૩॥

કાંસ્યસાલાદુત્તરે તુ તામ્રસાલઃ પ્રકીર્તિતઃ ।
ચતુરસ્રસમાકાર ઉન્નત્યા સપ્તયોજનઃ ॥ ૩૪॥

દ્વયોસ્તુ સાલયોર્મધ્યે સમ્પ્રોક્તા કલ્પવાટિકા ।
યેષાં તરૂણાં પુષ્પાણિ કાઞ્ચનાભાનિ ભૂમિપ ॥ ૩૫॥

પત્રાણિ કાઞ્ચનાભાનિ રત્નબીજફલાનિ ચ ।
દશયોજનગન્ધો હિ પ્રસર્પતિ સમન્તતઃ ॥ ૩૬॥

તદ્વનં રક્ષિતં રાજન્ વસન્તેનર્તુનાનિશમ્ ।
પુષ્પસિંહાસનાસીનઃ પુષ્પચ્છત્રવિરાજિતઃ ॥ ૩૭॥

પુષ્પભૂષાભૂષિતશ્ચ પુષ્પાસવવિઘૂર્ણિતઃ ।
મધુશ્રીર્માધવશ્રીશ્ચ દ્વે ભાર્યે તસ્ય સમ્મતે ॥ ૩૮॥

ક્રીડતઃ સ્મેરવદને સુમસ્તબકકન્દુકૈઃ ।
અતીવ રમ્યં વિપિનં મધુસ્રાવિ સમન્તતઃ ॥ ૩૯॥

દશયોજનપર્યન્તં કુસુમામોદવાયુના ।
પૂરિતં દિવ્યગન્ધર્વૈઃ સાઙ્ગનૈર્ગાનલોલુપૈઃ ॥ ૪૦॥

શોભિતં તદ્વનં દિવ્યં મત્તકોકિલનાદિતમ્ ।
વસન્તલક્ષ્મીસંયુક્તં કામિકામપ્રવર્ધનમ્ ॥ ૪૧॥

તામ્રસાલાદુત્તરત્ર સીસસાલઃ પ્રકીર્તિતઃ ।
સમુચ્છ્રાયઃ સ્મૃતોઽપ્યસ્ય સપ્તયોજનસઙ્ખ્યયા ॥ ૪૨॥

સન્તાનવાટિકામધ્યે સાલયોસ્તુ દ્વયોર્નૃપ ।
દશયોજનગન્ધસ્તુ પ્રસૂનાનાં સમન્તતઃ ॥ ૪૩॥

હિરણ્યાભાનિ કુસુમાન્યુત્ફુલ્લાનિ નિરન્તરમ્ ।
અમૃતદ્રવસંયુક્તફલાનિ મધુરાણિ ચ ॥ ૪૪॥

ગ્રીષ્મર્તુર્નાયકસ્તસ્યા વાટિકાયા નૃપોત્તમ ।
શુક્રશ્રીશ્ચ શુચિશ્રીશ્ચ દ્વે ભાર્યે તસ્ય સમ્મતે ॥ ૪૫॥

સન્તાપત્રસ્તલોકાસ્તુ વૃક્ષમૂલેષુ સંસ્થિતાઃ ।
નાનાસિદ્ધૈઃ પરિવૃતો નાનાદેવૈઃ સમન્વિતઃ ॥ ૪૬॥

વિલાસિનીનાં વૃન્દૈસ્તુ ચન્દનદ્રવપઙ્કિલૈઃ ।
પુષ્પમાલાભૂષિતૈસ્તુ તાલવૃન્તકરામ્બુજૈઃ ॥ ૪૭॥

પ્રાકારઃ શોભિતો રાજઞ્છીતલામ્બુનિષેવિભિઃ ।
સીસસાલાદુત્તરત્રાપ્યારકૂટમયઃ શુભઃ ॥ ૪૮॥

પ્રાકારો વર્તતે રાજન્ મુનિયોજનદૈર્ઘ્યવાન્ ।
હરિચન્દનવૃક્ષાણાં વાટી મધ્યે તયોઃ સ્મૃતા ॥ ૪૯॥

સાલયોરધિનાથસ્તુ વર્ષર્તુર્મેઘવાહનઃ ।
વિદ્યુત્પિઙ્ગલનેત્રશ્ચ જીમૂતકવચઃ સ્મૃતઃ ॥ ૫૦॥

વજ્રનિર્ઘોષમુખરશ્ચેન્દ્રધન્વા સમન્તતઃ ।
સહસ્રશો વારિધારા મુઞ્ચન્નાસ્તે ગણાવૃતઃ ॥ ૫૧॥

નભઃશ્રીશ્ચ નભસ્યશ્રીઃ સ્વરસ્યા રસ્યમાલિની ।
અમ્બા દુલા નિરત્નિશ્ચાભ્રમન્તી મેઘયન્તિકા ॥ ૫૨॥

વર્ષયન્તી ચિપુણિકા વારિધારા ચ સમ્મતાઃ ।
વર્ષર્તોર્દ્વાદશ પ્રોક્તાઃ શક્તયો મદવિહ્વલાઃ ॥ ૫૩॥

નવપલ્લવવૃક્ષાશ્ચ નવીનલતિકાન્વિતાઃ ।
હરિતાનિ તૃણાન્યેવ વેષ્ટિતા યૈર્ધરાખિલા ॥ ૫૪॥

નદીનદપ્રવાહાશ્ચ પ્રવહન્તિ ચ વેગતઃ ।
સરાંસિ કલુષામ્બૂનિ રાગિચિત્તસમાનિ ચ ॥ ૫૫॥

વસન્તિ દેવાઃ સિદ્ધાશ્ચ યે દેવીકર્મકારિણઃ ।
વાપીકૂપતડાગાશ્ચ યે દેવ્યર્થં સમર્પિતાઃ ॥ ૫૬॥

તે ગણા નિવસન્ત્યત્ર સવિલાસાશ્ચ સાઙ્ગનાઃ ।
આરકૂટમયાદગ્રે સપ્તયોજનદૈર્ઘ્યવાન્ ॥ ૫૭॥

પઞ્ચલોહાત્મકઃ સાલો મધ્યે મન્દારવાટિકા ।
નાનાપુષ્પલતાકીર્ણા નાનાપલ્લવશોભિતા ॥ ૫૮॥

અધિષ્ઠાતાત્ર સમ્પ્રોક્તઃ શરદૃતુરનામયઃ ।
ઇષુલક્ષ્મીરૂર્જલક્ષ્મીર્દ્વે ભાર્યે તસ્ય સમ્મતે ॥ ૫૯॥

નાનાસિદ્ધા વસન્ત્યત્ર સાઙ્ગનાઃ સપરિચ્છદાઃ ।
પઞ્ચલોહમયાદગ્રે સપ્તયોજનદૈર્ઘ્યવાન્ ॥ ૬૦॥

દીપ્યમાનો મહાશૃઙ્ગૈર્વર્તતે રૌપ્યસાલકઃ ।
પારિજાતાટવીમધ્યે પ્રસૂનસ્તબકાન્વિતા ॥ ૬૧॥

દશયોજનગન્ધીનિ કુસુમાનિ સમન્તતઃ ।
મોદયન્તિ ગણાન્સર્વાન્યે દેવીકર્મકારિણઃ ॥ ૬૨॥

તત્રાધિનાથઃ સમ્પ્રોક્તો હેમન્તર્તુર્મહોજ્જ્વલઃ ।
સગણઃ સાયુધઃ સર્વાન્ રાગિણો રઞ્જયન્નૃપ ॥ ૬૩॥

સહશ્રીશ્ચ સહસ્યશ્રીર્દ્વે ભાર્યે તસ્ય સમ્મતે ।
વસન્તિ તત્ર સિદ્ધાશ્ચ યે દેવીવ્રતકારિણઃ ॥ ૬૪॥

રૌપ્યસાલમયાદગ્રે સપ્તયોજનદૈર્ઘ્યવાન્ ।
સૌવર્ણસાલઃ સમ્પ્રોક્તસ્તપ્તહાટકકલ્પિતઃ ॥ ૬૫॥

મધ્યે કદમ્બવાટી તુ પુષ્પપલ્લવશોભિતા ।
કદમ્બમદિરાધારાઃ પ્રવર્તન્તે સહસ્રશઃ ॥ ૬૬॥

યાભિર્નિપીતપીતાભિર્નિજાનન્દોઽનુભૂયતે ।
તત્રાધિનાથઃ સમ્પ્રોક્તઃ શૈશિરર્તુર્મહોદયઃ ॥ ૬૭॥

તપઃશ્રીશ્ચ તપસ્યશ્રીર્દ્વે ભાર્યે તસ્ય સમ્મતે ।

મોદમાનઃ સહૈતાભ્યાં વર્તતે શિશિરાકૃતિઃ ॥ ૬૮॥

નાનાવિલાસસંયુક્તો નાનાગણસમાવૃતઃ ।
નિવસન્તિ મહાસિદ્ધા યે દેવીદાનકારિણઃ ॥ ૬૯॥

નાનાભોગસમુત્પન્નમહાનન્દસમન્વિતાઃ ।
સાઙ્ગનાઃ પરિવારૈસ્તુ સઙ્ઘશઃ પરિવારિતાઃ ॥ ૭૦॥

સ્વર્ણસાલમયાદગ્રે મુનિયોજનદૈર્ઘ્યવાન્ ।
પુષ્પરાગમયઃ સાલઃ કુઙ્કુમારુણવિગ્રહઃ ॥ ૭૧॥

પુષ્પરાગમયી ભૂમિર્વનાન્યુપવનાનિ ચ ।
રત્નવૃક્ષાલવાલાશ્ચ પુષ્પરાગમયાઃ સ્મૃતાઃ ॥ ૭૨॥

પ્રાકારો યસ્ય રત્નસ્ય તદ્રત્નરચિતા દ્રુમાઃ ।
વનભૂઃ પક્ષિણશ્ચૈવ રત્નવર્ણજલાનિ ચ ॥ ૭૩॥

મણ્ડપા મણ્ડપસ્તમ્ભાઃ સરાંસિ કમલાનિ ચ ।
પ્રાકારે તત્ર યદ્યત્સ્યાત્તત્સર્વં તત્સમં ભવેત્ ॥ ૭૪॥

પરિભાષેયમુદ્દિષ્ટા રત્નસાલાદિષુ પ્રભો ।
તેજસા સ્યાલ્લક્ષગુણઃ પૂર્વસાલાત્પરો નૃપ ॥ ૭૫॥

દિક્પાલા નિવસન્ત્યત્ર પ્રતિબ્રહ્માણ્ડવર્તિનામ્ ।
દિક્પાલાનાં સમષ્ટ્યાત્મરૂપાઃ સ્ફૂર્જદ્વરાયુધાઃ ॥ ૭૬॥

પૂર્વાશાયાં સમુત્તુઙ્ગશૃઙ્ગા પૂરમરાવતી ।
નાનોપવનસંયુક્તો મહેન્દ્રસ્તત્ર રાજતે ॥ ૭૭॥

સ્વર્ગશોભા ચ યા સ્વર્ગે યાવતી સ્યાત્તતોઽધિકા ।
સમષ્ટિશતનેત્રસ્ય સહસ્રગુણતઃ સ્મૃતા ॥ ૭૮॥

ઐરાવતસમારૂઢો વજ્રહસ્તઃ પ્રતાપવાન્ ।
દેવસેનાપરિવૃતો રાજતેઽત્ર શતક્રતુઃ ॥ ૭૯॥

દેવાઙ્ગનાગણયુતા શચી તત્ર વિરાજતે ।
વહ્નિકોણે વહ્નિપુરી વહ્નિપૂઃસદૃશી નૃપ ॥ ૮૦॥

સ્વાહાસ્વધાસમાયુક્તો વહ્નિસ્તત્ર વિરાજતે ।
નિજવાહનભૂષાઢ્યો નિજદેવગણૈર્વૃતઃ ॥ ૮૧॥

યામ્યાશાયાં યમપુરી તત્ર દણ્ડધરો મહાન્ ।
સ્વભટૈર્વેષ્ટિતો રાજન્ ચિત્રગુપ્તપુરોગમૈઃ ॥ ૮૨॥

નિજશક્તિયુતો ભાસ્વત્તનયોઽસ્તિ યમો મહાન્ ।
નૈરૃત્યાં દિશિ રાક્ષસ્યાં રાક્ષસૈઃ પરિવારિતઃ ॥ ૮૩॥

ખડ્ગધારી સ્ફુરન્નાસ્તે નિરૃતિર્નિજશક્તિયુક્ ।
વારુણ્યાં વરુણો રાજા પાશધારી પ્રતાપવાન્ ॥ ૮૪॥

મહાઝષસમારૂઢો વારુણીમધુવિહ્વલઃ ।
નિજશક્તિસમાયુક્તો નિજયાદોગણાન્વિતઃ ॥ ૮૫॥

સમાસ્તે વારુણે લોકે વરુણાનીરતાકુલઃ ।
વાયુકોણે વાયુલોકો વાયુસ્તત્રાધિતિષ્ઠતિ ॥ ૮૬॥

વાયુસાધનસંસિદ્ધયોગિભિઃ પરિવારિતઃ ।
ધ્વજહસ્તો વિશાલાક્ષો મૃગવાહનસંસ્થિતઃ ॥ ૮૭॥

મરુદ્ગણૈઃ પરિવૃતો નિજશક્તિસમન્વિતઃ ।
ઉત્તરસ્યાં દિશિ મહાન્ યક્ષલોકોઽસ્તિ ભૂમિપ ॥ ૮૮॥

યક્ષાધિરાજસ્તત્રાસ્તે વૃદ્ધિઋદ્ધ્યાદિશક્તિભિઃ ।
નવભિર્નિધિભિર્યુક્તસ્તુન્દિલો ધનનાયકઃ ॥ ૮૯॥

મણિભદ્રઃ પૂર્ણભદ્રો મણિમાન્મણિકન્ધરઃ ।
મણિભૂષો મણિસ્રગ્વી મણિકાર્મુકધારકઃ ॥ ૯૦॥

ઇત્યાદિયક્ષસેનાનીસહિતો નિજશક્તિયુક્ ।
ઈશાનકોણે સમ્પ્રોક્તો રુદ્રલોકો મહત્તરઃ ॥ ૯૧॥

અનર્ઘ્યરત્નખચિતો યત્ર રુદ્રોઽધિદૈવતમ્ ।
મન્યુમાન્દીપ્તનયનો બદ્ધપૃષ્ઠમહેષુધિઃ ॥ ૯૨॥

સ્ફૂર્જદ્ધનુર્વામહસ્તોઽધિજ્યધન્વભિરાવૃતઃ ।
સ્વસમાનૈરસઙ્ખ્યાતરુદ્રૈઃ શૂલવરાયુધૈઃ ॥ ૯૩॥

વિકૃતાસ્યૈઃ કરાલાસ્યૈર્વમદ્વહ્નિભિરાસ્યતઃ ।
દશહસ્તૈઃ શતકરૈઃ સહસ્રભુજસંયુતૈઃ ॥ ૯૪॥

દશપાદૈર્દશગ્રીવૈસ્ત્રિનેત્રૈરુગ્રમૂર્તિભિઃ ।
અન્તરિક્ષચરા યે ચ યે ચ ભૂમિચરા સ્મૃતાઃ ॥ ૯૫॥

રુદ્રાધ્યાયે સ્મૃતા રુદ્રાસ્તૈઃ સર્વૈશ્ચ સમાવૃતઃ ।
રુદ્રાણીકોટિસહિતો ભદ્રકાલ્યાદિમાતૃભિઃ ॥ ૯૬॥

નાનાશક્તિસમાવિષ્ટડામર્યાદિગણાવૃતઃ ।
વીરભદ્રાદિસહિતો રુદ્રો રાજન્ વિરાજતે ॥ ૯૭॥

મુણ્ડમાલાધરો નાગવલયો નાગકન્ધરઃ ।
વ્યાઘ્રચર્મપરીધાનો ગજચર્મોત્તરીયકઃ ॥ ૯૮॥

ચિતાભસ્માઙ્ગ લિપ્તાઙ્ગઃ પ્રમથાદિગણાવૃતઃ ।
નિનદડ્ડમરુધ્વાનૈર્બધિરીકૃતદિઙ્મુખઃ ॥ ૯૯॥

અટ્ટહાસાસ્ફોટશબ્દૈઃ સન્ત્રાસિતનભસ્તલઃ ।
ભૂતસઙ્ઘસમાવિષ્ટો ભૂતાવાસો મહેશ્વરઃ ।
ઈશાનદિક્પતિઃ સોઽયં નામ્ના ચેશાન એવ ચ ॥ ૧૦૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વાદશસ્કન્ધે મણિદ્વીપવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૧૨.૧૦॥

## ૧૨.૧૧ એકાદશોઽધ્યાયઃ । પદ્મરાગાદિમણિવિનિર્મિતપ્રાકારવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
પુષ્પરાગમયાદગ્રે કુઙ્કુમારુણવિગ્રહઃ ।
પદ્મરાગમયઃ સાલો મધ્યે ભૂશ્ચૈવ તાદૃશી ॥ ૧॥

દશયોજનવાન્દૈર્ઘ્યે ગોપુરદ્વારસંયુતઃ ।
તન્મણિસ્તમ્ભસંયુક્તા મણ્ડપાઃ શતશો નૃપ ॥ ૨॥

મધ્યે ભુવિ સમાસીનાશ્ચતુઃષષ્ટિમિતાઃ કલાઃ ।
નાનાયુધધરા વીરા રત્નભૂષણભૂષિતાઃ ॥ ૩॥

પ્રત્યેકલોકસ્તાસાં તુ તત્તલ્લોકસ્ય નાયકાઃ ।
સમન્તાત્પદ્મરાગસ્ય પરિવાર્ય સ્થિતાઃ સદા ॥ ૪॥

સ્વસ્વલોકજનૈર્જુષ્ટાઃ સ્વસ્વવાહનહેતિભિઃ ।
તાસાં નામાનિ વક્ષ્યામિ શ‍ૃણુ ત્વં જનમેજય ॥ ૫॥

પિઙ્ગલાક્ષી વિશાલાક્ષી સમૃદ્ધિર્વૃદ્ધિરેવ ચ ।

શ્રદ્ધા સ્વાહા સ્વધાભિખ્યા માયા સંજ્ઞા વસુન્ધરા ॥ ૬॥

ત્રિલોકધાત્રી સાવિત્રી ગાયત્રી ત્રિદશેશ્વરી ।
સુરૂપા બહુરૂપા ચ સ્કન્દમાતાચ્યુતપ્રિયા ॥ ૭॥

વિમલા ચામલા તદ્વદરુણી પુનરારુણી ।
પ્રકૃતિર્વિકૃતિઃ સૃષ્ટિઃ સ્થિતિઃ સંહૃતિરેવ ચ ॥ ૮॥

સન્ધ્યા માતા સતી હંસી મર્દિકા વજ્રિકા પરા ।
દેવમાતા ભગવતી દેવકી કમલાસના ॥ ૯॥

ત્રિમુખી સપ્તમુખ્યન્યા સુરાસુરવિમર્દિની ।
લમ્બોષ્ઠી ચોર્ધ્વકેશી ચ બહુશીર્ષા વૃકોદરી ॥ ૧૦॥

રથરેખાહ્વયા પશ્ચાચ્છશિરેખા તથાપરા ।
ગગનવેગા પવનવેગા વેગા ચૈવ તતઃ પરમ્ ॥ ૧૧॥

અગ્રે ભુવનપાલા સ્યાત્તત્પશ્ચાન્મદનાતુરા ।
અનઙ્ગાનઙ્ગમથના તથૈવાનઙ્ગમેખલા ॥ ૧૨॥

અનઙ્ગકુસુમા પશ્ચાદ્વિશ્વરૂપા સુરાદિકા ।
ક્ષયઙ્કરી ભવેચ્છક્તિરક્ષોભ્યા ચ તતઃ પરમ્ ॥ ૧૩॥

સત્યવાદિન્યથ પ્રોક્તા બહુરૂપા શુચિવ્રતા ।
ઉદારાખ્યા ચ વાગીશી ચતુઃષષ્ટિમિતાઃ સ્મૃતાઃ ॥ ૧૪॥

જ્વલજ્જિહ્વાનનાઃ સર્વા વમન્ત્યો વહ્નિમુલ્બણમ્ ।
જલં પિબામઃ સકલં સંહરામો વિભાવસુમ્ ॥ ૧૫॥

પવનં સ્તમ્ભયામોઽદ્ય ભક્ષયામોઽખિલં જગત્ ।
ઇતિ વાચં સઙ્ગિરન્તે ક્રોધસંરક્તલોચનાઃ ॥ ૧૬॥

ચાપબાણધરાઃ સર્વા યુદ્ધાયૈવોત્સુકાઃ સદા ।
દંષ્ટ્રાકટકટારાવૈર્બધિરીકૃતદિઙ્મુખાઃ ॥ ૧૭॥

પિઙ્ગોર્ધ્વકેશ્યઃ સમ્પ્રોક્તાશ્ચાપબાણકરાઃ સદા ।
શતાક્ષૌહિણિકા સેનાપ્યેકૈકસ્યાઃ પ્રકીર્તિતા ॥ ૧૮॥

એકૈકશક્તેઃ સામર્થ્યં લક્ષબ્રહ્માણ્ડનાશને ।
શતાક્ષૌહિણિકા સેના તાદૃશી નૃપસત્તમ ॥ ૧૯॥

કિં ન કુર્યાજ્જગત્યસ્મિન્નશક્યં વક્તુમેવ તત્ ।
સર્વાપિ યુદ્ધસામગ્રી તસ્મિન્સાલે સ્થિતા મુને ॥ ૨૦॥

રથાનાં ગણના નાસ્તિ હયાનાં કરિણાં તથા ।
શસ્ત્રાણાં ગણના તદ્વદ્ગણાનાં ગણના તથા ॥ ૨૧॥

પદ્મરાગમયાદગ્રે ગોમેદમણિનિર્મિતઃ ।
દશયોજનદૈર્ઘ્યેણ પ્રાકારો વર્તતે મહાન્ ॥ ૨૨॥

ભાસ્વજ્જપાપ્રસૂનાભો મધ્યભૂસ્તસ્ય તાદૃશી ।
ગોમેદકલ્પિતાન્યેવ તદ્વાસિસદનાનિ ચ ॥ ૨૩॥

પક્ષિણઃ સ્તમ્ભવર્યાશ્ચ વૃક્ષા વાપ્યઃ સરાંસિ ચ ।
ગોમેદકલ્પિતા એવ કુઙ્કુમારુણવિગ્રહાઃ ॥ ૨૪॥

તન્મધ્યસ્થા મહાદેવ્યો દ્વાત્રિંશચ્છક્તયઃ સ્મૃતાઃ ।
નાનાશસ્ત્રપ્રહરણા ગોમેદમણિભૂષિતાઃ ॥ ૨૫॥

પ્રત્યેકલોકવાસિન્યઃ પરિવાર્ય સમન્તતઃ ।
ગોમેદસાલે સન્નદ્ધાઃ પિશાચવદના નૃપ ॥ ૨૬॥

સ્વર્લોકવાસિભિર્નિત્યં પૂજિતાશ્ચક્રબાહવઃ ।
ક્રોધરક્તેક્ષણા ભિન્ધિ પચચ્છિન્ધિ દહેતિ ચ ॥ ૨૭॥

વદન્તિ સતતં વાચં યુદ્ધોત્સુકહૃદન્તરાઃ ।
એકૈકસ્યા મહાશક્તેર્દશાક્ષૌહિણિકા મતા ॥ ૨૮॥

સેના તત્રાપ્યેકશક્તિર્લક્ષબ્રહ્માણ્ડનાશિની ।
તાદૃશીનાં મહાસેના વર્ણનીયા કથં નૃપ ॥ ૨૯॥

રથાનાં નૈવ ગણના વાહનાનાં તથૈવ ચ ।
સર્વયુદ્ધસમારમ્ભસ્તત્ર દેવ્યા વિરાજતે ॥ ૩૦॥

તાસાં નામાનિ વક્ષ્યામિ પાપનાશકરાણિ ચ ।
વિદ્યાહ્રીપુષ્ટયઃ પ્રજ્ઞા સિનીવાલી કુહૂસ્તથા ॥ ૩૧॥

રુદ્રા વીર્યા પ્રભા નન્દા પોષિણી ઋદ્ધિદા શુભા ।
કાલરાત્રિર્મહારાત્રિર્ભદ્રકાલી કપર્દિની ॥ ૩૨॥

વિકૃતિર્દણ્ડિમુણ્ડિન્યૌ સેન્દુખણ્ડા શિખણ્ડિની ।
નિશુમ્ભશુમ્ભમથિની મહિષાસુરમર્દિની ॥ ૩૩॥

ઇન્દ્રાણી ચૈવ રુદ્રાણી શઙ્કરાર્ધશરીરિણી ।
નારી નારાયણી ચૈવ ત્રિશૂલિન્યપિ પાલિની ॥ ૩૪॥

અમ્બિકા હ્લાદિની પશ્ચાદિત્યેવં શક્તયઃ સ્મૃતાઃ ।
યદ્યેતાઃ કુપિતા દેવ્યસ્તદા બ્રહ્માણ્ડનાશનમ્ ॥ ૩૫॥

પરાજયો ન ચૈતાસાં કદાચિત્ક્વચિદસ્તિ હિ ।
ગોમેદકમયાદગ્રે સદ્વજ્રમણિનિર્મિતઃ ॥ ૩૬॥

દશયોજનતુઙ્ગોઽસૌ ગોપુરદ્વારસંયુતઃ ।
કપાટશૃઙ્ખલાબદ્ધો નવવૃક્ષસમુજ્જ્વલઃ ॥ ૩૭॥

સાલસ્તન્મધ્યભૂમ્યાદિ સર્વં હીરમયં સ્મૃતમ્ ।
ગૃહાણિ વીથયો રથ્યા મહામાર્ગાઙ્ગણાનિ ચ ॥ ૩૮॥

વૃક્ષાલવાલતરવઃ સારઙ્ગા અપિ તાદૃશાઃ ।
દીર્ઘિકાશ્રેણયો વાપ્યસ્તડાગાઃ કૂપસંયુતાઃ ॥ ૩૯॥

તત્ર શ્રીભુવનેશ્વર્યા વસન્તિ પરિચારિકાઃ ।
એકૈકા લક્ષદાસીભિઃ સેવિતા મદગર્વિતાઃ ॥ ૪૦॥

તાલવૃન્તધરાઃ કાશ્ચિચ્ચષકાઢ્યકરામ્બુજાઃ ।
કાશ્ચિત્તામ્બૂલપાત્રાણિ ધારયન્ત્યોઽતિગર્વિતાઃ ॥ ૪૧॥

કાશ્ચિત્તચ્છત્રધારિણ્યશ્ચામરાણાં વિધારિકાઃ ।
નાનાવસ્ત્રધરાઃ કાશ્ચિત્કાશ્ચિત્પુષ્પકરામ્બુજાઃ ॥ ૪૨॥

નાનાદર્શકરાઃ કાશ્ચિત્કાશ્ચિત્કુઙ્કુમલેપનમ્ ।
ધારયન્ત્યઃ કજ્જલં ચ સિન્દૂરચષકં પરાઃ ॥ ૪૩॥

કાશ્ચિચ્ચિત્રકનિર્માત્ર્યઃ પાદસંવાહને રતાઃ ।
કાશ્ચિત્તુ ભૂષાકારિણ્યો નાનાભૂષાધરાઃ પરાઃ ॥ ૪૪॥

પુષ્પભૂષણનિર્માત્ર્યઃ પુષ્પશૃઙ્ગારકારિકાઃ ।
નાનાવિલાસચતુરા બહ્વ્ય એવંવિધાઃ પરાઃ ॥ ૪૫॥

નિબદ્ધપરિધાનીયા યુવત્યઃ સકલા અપિ ।
દેવીકૃપાલેશવશાત્તુચ્છીકૃતજગત્ત્રયાઃ ॥ ૪૬॥

એતા દૂત્યઃ સ્મૃતા દેવ્યઃ શૃઙ્ગારમદગર્વિતાઃ ।

તાસાં નામાનિ વક્ષ્યામિ શ‍ૃણુ મે નૃપસત્તમ ॥ ૪૭॥

અનઙ્ગરૂપા પ્રથમાપ્યનઙ્ગમદના પરા ।
તૃતીયા તુ તતઃ પ્રોક્તા સુન્દરી મદનાતુરા ॥ ૪૮॥

તતો ભુવનવેગા સ્યાત્તથા ભુવનપાલિકા ।
સ્યાત્સર્વશિશિરાનઙ્ગવદનાનઙ્ગમેખલા ॥ ૪૯॥

વિદ્યુદ્દામસમાનાઙ્ગ્યઃ ક્વણત્કાઞ્ચીગુણાન્વિતાઃ ।
રણન્મઞ્જીરચરણા બહિરન્તરિતસ્તતઃ ॥ ૫૦॥

ધાવમાનાસ્તુ શોભન્તે સર્વા વિદ્યુલ્લતોપમાઃ ।
કુશલાઃ સર્વકાર્યેષુ વેત્રહસ્તાઃ સમન્તતઃ ॥ ૫૧॥

અષ્ટદિક્ષુ તથૈતાસાં પ્રાકારાદ્બહિરેવ ચ ।
સદનાનિ વિરાજન્તે નાનાવાહનહેતિભિઃ ॥ ૫૨॥

વજ્રસાલાદગ્રભાગે સાલો વૈદૂર્યનિર્મિતઃ ।
દશયોજનતુઙ્ગોઽસૌ ગોપુરદ્વારભૂષિતઃ ॥ ૫૩॥

વૈદૂર્યભૂમિઃ સર્વાપિ ગૃહાણિ વિવિધાનિ ચ ।
વીથ્યો રથ્યા મહામાર્ગાઃ સર્વે વૈદૂર્યનિર્મિતાઃ ॥ ૫૪॥

વાપીકૂપતડાગાશ્ચ સ્રવન્તીનાં તટાનિ ચ ।
બાલુકા ચૈવ સર્વાપિ વૈદૂર્યમણિનિર્મિતા ॥ ૫૫॥

તત્રાષ્ટદિક્ષુ પરિતો બ્રાહ્મ્યાદીનાં ચ મણ્ડલમ્ ।
નિજૈર્ગણૈઃ પરિવૃતં ભ્રાજતે નૃપસત્તમ ॥ ૫૬॥

પ્રતિબ્રહ્માણ્ડમાતૃણાં તાઃ સમષ્ટય ઈરિતાઃ ।
બ્રાહ્મી માહેશ્વરી ચૈવ કૌમારી વૈષ્ણવી તથા ॥ ૫૭॥

વારાહી ચ તથેન્દ્રાણી ચામુણ્ડા સપ્ત માતરઃ ।
અષ્ટમી તુ મહાલક્ષ્મીર્નામ્ના પ્રોક્તાસ્તુ માતરઃ ॥ ૫૮॥

બ્રહ્મરુદ્રાદિદેવાનાં સમાકારાસ્તુ તાઃ સ્મૃતાઃ ।
જગત્કલ્યાણકારિણ્યઃ સ્વસ્વસેનાસમાવૃતાઃ ॥ ૫૯॥

તત્સાલસ્ય ચતુર્દ્વાર્ષુ વાહનાનિ મહેશિતુઃ ।
સજ્જાનિ નૃપતે સન્તિ સાલઙ્કારાણિ નિત્યશઃ ॥ ૬૦॥

દન્તિનઃ કોટિશો વાહાઃ કોટિશઃ શિબિકાસ્તથા ।
હંસાઃ સિંહાશ્ચ ગરુડા મયૂરા વૃષભાસ્તથા ॥ ૬૧॥

તૈર્યુક્તાઃ સ્યન્દનાસ્તદ્વત્કોટિશો નૃપનન્દન ।
પાર્ષ્ણિગ્રાહસમાયુક્તા ધ્વજૈરાકાશચુમ્બિનઃ ॥ ૬૨॥

કોટિશસ્તુ વિમાનાનિ નાનાચિહ્નાન્વિતાનિ ચ ।
નાનાવાદિત્રયુક્તાનિ મહાધ્વજયુતાનિ ચ ॥ ૬૩॥

વૈદૂર્યમણિસાલસ્યાપ્યગ્રે સાલઃ પરઃ સ્મૃતઃ ।
દશયોજનતુઙ્ગોઽસાવિન્દ્રનીલાશ્મનિર્મિતઃ ॥ ૬૪॥

તન્મધ્યભૂસ્તથા વીથ્યો મહામાર્ગા ગૃહાણિ ચ ।
વાપીકૂપતડાગાશ્ચ સર્વે તન્મણિનિર્મિતાઃ ॥ ૬૫॥

તત્ર પદ્મં તુ સમ્પ્રોક્તં બહુયોજનવિસ્તૃતમ્ ।
ષોડશારં દીપ્યમાનં સુદર્શનમિવાપરમ્ ॥ ૬૬॥

તત્ર ષોડશશક્તીનાં સ્થાનાનિ વિવિધાનિ ચ ।
સર્વોપસ્કરયુક્તાનિ સમૃદ્ધાનિ વસન્તિ હિ ॥ ૬૭॥

તાસાં નામાનિ વક્ષ્યામિ શ ૃણુ મે નૃપસત્તમ ।
કરાલી વિકરાલી ચ તથોમા ચ સરસ્વતી ॥ ૬૮॥

શ્રીદુર્ગોષા તથા લક્ષ્મીઃ શ્રુતિશ્ચૈવ સ્મૃતિર્ધૃતિઃ ।
શ્રદ્ધા મેધા મતિઃ કાન્તિરાર્યા ષોડશ શક્તયઃ ॥ ૬૯॥

નીલજીમૂતસઙ્કાશાઃ કરવાલકરામ્બુજાઃ ।
સમાઃ ખેટકધારિણ્યો યુદ્ધોપક્રાન્તમાનસાઃ ॥ ૭૦॥

સેનાન્યઃ સકલા એતાઃ શ્રીદેવ્યા જગદીશિતુઃ ।
પ્રતિબ્રહ્માણ્ડસંસ્થાનાં શક્તીનાં નાયિકાઃ સ્મૃતાઃ ॥ ૭૧॥

બ્રહ્માણ્ડક્ષોભકારિણ્યો દેવીશક્ત્યુપબૃંહિતાઃ ।
નાનારથસમારૂઢા નાનાશક્તિભિરન્વિતાઃ ॥ ૭૨॥

એતત્પરાક્રમં વક્તું સહસ્રાસ્યોઽપિ ન ક્ષમઃ ।
ઇન્દ્રનીલમહાસાલાદગ્રે તુ બહુવિસ્તૃતઃ ॥ ૭૩॥

મુક્તાપ્રાકાર ઉદિતો દશયોજનદૈર્ઘ્યવાન્ ।
મધ્યભૂઃ પૂર્વવત્પ્રોક્તા તન્મધ્યેઽષ્ટદલામ્બુજમ્ ॥ ૭૪॥

મુક્તામણિગણાકીર્ણં વિસ્તૃતં તુ સકેસરમ્ ।
તત્ર દેવીસમાકારા દેવ્યાયુધધરાઃ સદા ॥ ૭૫॥

સમ્પ્રોક્તા અષ્ટમન્ત્રિણ્યો જગદ્વાર્તાપ્રબોધિકાઃ ।
દેવીસમાનભોગાસ્તા ઇઙ્ગિતજ્ઞાસ્તુ પણ્ડિતાઃ ॥ ૭૬॥

કુશલાઃ સર્વકાર્યેષુ સ્વામિકાર્યપરાયણાઃ ।
દેવ્યભિપ્રાયબોધ્યસ્તાશ્ચતુરા અતિસુન્દરાઃ ॥ ૭૭॥

નાનાશક્તિસમાયુક્તાઃ પ્રતિબ્રહ્માણ્ડવર્તિનામ્ ।
પ્રાણિનાં તાઃ સમાચારં જ્ઞાનશક્ત્યા વિદન્તિ ચ ॥ ૭૮॥

તાસાં નામાનિ વક્ષ્યામિ મત્તઃ શ‍ૃણુ નૃપોત્તમ ।
અનઙ્ગકુસુમા પ્રોક્તાપ્યનઙ્ગકુસુમાતુરા ॥ ૭૯॥

અનઙ્ગમદના તદ્વદનઙ્ગમદનાતુરા ।
ભુવનપાલા ગગનવેગા ચૈવ તતઃ પરમ્ ॥ ૮૦॥

શશિરેખા ચ ગગનરેખા ચૈવ તતઃ પરમ્ ।
પાશાઙ્કુશવરાભીતિધરા અરુણવિગ્રહાઃ ॥ ૮૧॥

વિશ્વસમ્બન્ધિનીં વાર્તાં બોધયન્તિ પ્રતિક્ષણમ્ ।
મુક્તાસાલાદગ્રભાગે મહામારકતોઽપરઃ ॥ ૮૨॥

સાલોત્તમઃ સમુદ્દિષ્ટો દશયોજનદૈર્ઘ્યવાન્ ।
નાનાસૌભાગ્યસંયુક્તો નાનાભોગસમન્વિતઃ ॥ ૮૩॥

મધ્યભૂસ્તાદૃશી પ્રોક્તા સદનાનિ તથૈવ ચ ।
ષટ્કોણમત્ર વિસ્તીર્ણં કોણસ્થા દેવતાઃ શ‍ૃણુ ॥ ૮૪॥

પૂર્વકોણે ચતુર્વક્ત્રો ગાયત્રીસહિતો વિધિઃ ।
કુણ્ડિકાક્ષગુણાભીતિદણ્ડાયુધધરઃ પરઃ ॥ ૮૫॥

તદાયુધધરા દેવી ગાયત્રી પરદેવતા ।
વેદાઃ સર્વે મૂર્તિમન્તઃ શાસ્ત્રાણિ વિવિધાનિ ચ ॥ ૮૬॥

સ્મૃતયશ્ચ પુરાણાનિ મૂર્તિમન્તિ વસન્તિ હિ ।
યે બ્રહ્મવિગ્રહાઃ સન્તિ ગાયત્રીવિગ્રહાશ્ચ યે ॥ ૮૭॥

વ્યાહૃતીનાં વિગ્રહાશ્ચ તે નિત્યં તત્ર સન્તિ હિ ।

રક્ષઃકોણે શઙ્ખચક્રગદામ્બુજકરામ્બુજા ॥ ૮૮॥

સાવિત્રી વર્તતે તત્ર મહાવિષ્ણુશ્ચ તાદૃશઃ ।
યે વિષ્ણુવિગ્રહાઃ સન્તિ મત્સ્યકૂર્માદયોઽખિલાઃ ॥ ૮૯॥

સાવિત્રીવિગ્રહા યે ચ તે સર્વે તત્ર સન્તિ હિ ।
વાયુકોણે પરશ્વક્ષમાલાભયવરાન્વિતઃ ॥ ૯૦॥

મહારુદ્રો વર્તતેઽત્ર સરસ્વત્યપિ તાદૃશી ।
યે યે તુ રુદ્રભેદાઃ સ્યુર્દક્ષિણાસ્યાદયો નૃપ ॥ ૯૧॥

ગૌરીભેદાશ્ચ યે સર્વે તે તત્ર નિવસન્તિ હિ ।
ચતુઃષષ્ટ્યાગમા યે ચ યે ચાન્યેઽપ્યાગમાઃ સ્મૃતાઃ ॥ ૯૨॥

તે સર્વે મૂર્તિમન્તશ્ચ તત્રૈવ નિવસન્તિ હિ ।
અગ્નિકોણે રત્નકુમ્ભં તથા મણિકરણ્ડકમ્ ॥ ૯૩॥

દધાનો નિજહસ્તાભ્યાં કુબેરો ધનદાયકઃ ।
નાનાવીથીસમાયુક્તો મહાલક્ષ્મીસમન્વિતઃ ॥ ૯૪॥

દેવ્યા નિધિપતિસ્ત્વાસ્તે સ્વગુણૈઃ પરિવેષ્ટિતઃ ।
વારુણે તુ મહાકોણે મદનો રતિસંયુતઃ ॥ ૯૫॥

પાશાઙ્કુશધનુર્બાણધરો નિત્યં વિરાજતે ।
શ‍ૃઙ્ગારા મૂર્તિમન્તસ્તુ તત્ર સન્નિહિતાઃ સદા ॥ ૯૬॥

ઈશાનકોણે વિઘ્નેશો નિત્યં પુષ્ટિસમન્વિતઃ ।
પાશાઙ્કુશધરો વીરો વિઘ્નહર્તા વિરાજતે ॥ ૯૭॥

વિભૂતયો ગણેશસ્ય યા યાઃ સન્તિ નૃપોત્તમ ।
તાઃ સર્વા નિવસન્ત્યત્ર મહૈશ્વર્યસમન્વિતાઃ ॥ ૯૮॥

પ્રતિબ્રહ્માણ્ડસંસ્થાનાં બ્રહ્માદીનાં સમષ્ટયઃ ।
એતે બ્રહ્માદયઃ પ્રોક્તાઃ સેવન્તે જગદીશ્વરીમ્ ॥ ૯૯॥

મહામારકતસ્યાગ્રે શતયોજનદૈર્ઘ્યવાન્ ।
પ્રવાલસાલોઽસ્ત્યપરઃ કુઙ્કુમારુણવિગ્રહઃ ॥ ૧૦૦॥

મધ્યભૂસ્તાદૃશી પ્રોક્તા સદનાનિ ચ પૂર્વવત્ ।
તન્મધ્યે પઞ્ચભૂતાનાં સ્વામિન્યઃ પઞ્ચ સન્તિ ચ ॥ ૧૦૧॥

હૃલ્લેખા ગગના રક્તા ચતુર્થી તુ કરાલિકા ।
મહોચ્છુષ્મા પઞ્ચમી ચ પઞ્ચભૂતસમપ્રભાઃ ॥ ૧૦૨॥

પાશાઙ્કુશવરાભીતિધારિણ્યોઽમિતભૂષણાઃ ।
દેવીસમાનવેષાઢ્યા નવયૌવનગર્વિતાઃ ॥ ૧૦૩॥

પ્રવાલસાલાદગ્રે તુ નવરત્નવિનિર્મિતઃ ।
બહુયોજનવિસ્તીર્ણો મહાસાલોઽસ્તિ ભૂમિપ ॥ ૧૦૪॥

તત્ર ચામ્નાયદેવીનાં સદનાનિ બહૂન્યપિ ।
નવરત્નમયાન્યેવ તડાગાશ્ચ સરાંસિ ચ ॥ ૧૦૫॥

શ્રીદેવ્યા યેઽવતારાઃ સ્યુસ્તે તત્ર નિવસન્તિ હિ ।
મહાવિદ્યા મહાભેદાઃ સન્તિ તત્રૈવ ભૂમિપ ॥ ૧૦૬॥

નિજાવરણદેવીભિર્નિજભૂષણવાહનૈઃ ।
સર્વદેવ્યો વિરાજન્તે કોટિસૂર્યસમપ્રભાઃ ॥ ૧૦૭॥

સપ્તકોટિમહામન્ત્રદેવતાઃ સન્તિ તત્ર હિ ।
નવરત્નમયાદગ્રે ચિન્તામણિગૃહં મહત્ ॥ ૧૦૮॥

તત્રત્યં વસ્તુમાત્રં તુ ચિન્તામણિવિનિર્મિતમ્ ।
સૂર્યોદ્ગારોપલૈસ્તદ્વચ્ચન્દ્રોદ્ગારોપલૈસ્તથા ॥ ૧૧૨॥

વિદ્યુત્પ્રભોપલૈઃ સ્તમ્ભાઃ કલ્પિતાસ્તુ સહસ્રશઃ ।
યેષાં પ્રભાભિરન્તઃસ્થં વસ્તુ કિઞ્ચિન્ન દૃશ્યતે ॥ ૧૧૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં દ્વાદશસ્કન્ધે પદ્મરાગાદિ-
મણિવિનિર્મિતપ્રાકારવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૧૨.૧૧॥

## ૧૨.૧૨ દ્વાદશોઽધ્યાયઃ । મણિદ્વીપવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તદેવ દેવીસદનં મધ્યભાગે વિરાજતે ।
સહસ્રસ્તમ્ભસંયુક્તાશ્ચત્વારસ્તેષુ મણ્ડપાઃ ॥ ૧॥

શ ृઙ્ગારમણ્ડપશ્ચૈકો મુક્તિમણ્ડપ એવ ચ ।
જ્ઞાનમણ્ડપસંજ્ઞસ્તુ તૃતીયઃ પરિકીર્તિતઃ ॥ ૨॥

એકાન્તમણ્ડપશ્ચૈવ ચતુર્થઃ પરિકીર્તિતઃ ।
નાનાવિતાનસંયુક્તા નાનાધૂપૈસ્તુ ધૂપિતાઃ ॥ ૩॥

કોટિસૂર્યસમાઃ કાન્ત્યા ભ્રાજન્તે મણ્ડપાઃ શુભાઃ ।
તન્મણ્ડપાનાં પરિતઃ કાશ્મીરવનિકા સ્મૃતા ॥ ૪॥

મલ્લિકાકુન્દવનિકા યત્ર પુષ્કલકાઃ સ્થિતાઃ ।
અસઙ્ખ્યાતા મૃગમદૈઃ પૂરિતાસ્તત્સ્રવા નૃપ ॥ ૫॥

મહાપદ્માટવી તદ્વદ્રત્નસોપાનનિર્મિતા ।
સુધારસેન સમ્પૂર્ણા ગુઞ્જન્મત્તમધુવ્રતા ॥ ૬॥

હંસકારણ્ડવાકીર્ણા ગન્ધપૂરિતદિક્તટા ।
વનિકાનાં સુગન્ધૈસ્તુ મણિદ્વીપં સુવાસિતમ્ ॥ ૭॥

શ‍ૃઙ્ગારમણ્ડપે દેવ્યો ગાયન્તિ વિવિધૈઃ સ્વરૈઃ ।
સભાસદો દેવવરા મધ્યે શ્રીજગદમ્બિકા ॥ ૮॥

મુક્તિમણ્ડપમધ્યે તુ મોચયત્યનિશં શિવા ।
જ્ઞાનોપદેશં કુરુતે તૃતીયે નૃપ મણ્ડપે ॥ ૯॥

ચતુર્થમણ્ડપે ચૈવ જગદ્રક્ષાવિચિન્તનમ્ ।
મન્ત્રિણીસહિતા નિત્યં કરોતિ જગદમ્બિકા ॥ ૧૦॥

ચિન્તામણિગૃહે રાજઞ્છક્તિતત્ત્વાત્મકૈઃ પરૈઃ ।
સોપાનૈર્દશભિર્યુક્તો મઞ્ચકોઽપ્યધિરાજતે ॥ ૧૧॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ।
એતે મઞ્ચખુરાઃ પ્રોક્તાઃ ફલકસ્તુ સદાશિવઃ ॥ ૧૨॥

તસ્યોપરિ મહાદેવો ભુવનેશો વિરાજતે ।
યા દેવી નિજલીલાર્થં દ્વિધાભૂતા બભૂવ હ ॥ ૧૩॥

સૃષ્ટ્યાદૌ તુ સ એવાયં તદર્ધાઙ્ગો મહેશ્વરઃ ।
કન્દર્પદર્પનાશોદ્યત્કોટિકન્દર્પસુન્દરઃ ॥ ૧૪॥

પઞ્ચવક્ત્રસ્ત્રિનેત્રશ્ચ મણિભૂષણભૂષિતઃ ।
હરિણાભીતિપરશૂન્ વરં ચ નિજબાહુભિઃ ॥ ૧૫॥

દધાનઃ ષોડશાબ્દોઽસૌ દેવઃ સર્વેશ્વરો મહાન્ ।
કોટિસૂર્યપ્રતીકાશશ્ચન્દ્રકોટિસુશીતલઃ ॥ ૧૬॥

શુદ્ધસ્ફટિકસઙ્કાશસ્ત્રિનેત્રઃ શીતલદ્યુતિઃ ।
વામાઙ્ગે સન્નિષણ્ણાસ્ય દેવી શ્રીભુવનેશ્વરી ॥ ૧૭॥

નવરત્નગણાકીર્ણકાઞ્ચીદામવિરાજિતા ।
તપ્તકાઞ્ચનસન્નદ્ધવૈદૂર્યાઙ્ગદભૂષણા ॥ ૧૮॥

કનચ્છ્રીચક્રતાટઙ્કવિટઙ્કવદનામ્બુજા ।
લલાટકાન્તિવિભવવિજિતાર્થસુધાકરા ॥ ૧૯॥

બિમ્બકાન્તિતિરસ્કારિરદચ્છદવિરાજિતા ।
લસત્કુઙ્કુમકસ્તુરીતિલકોદ્ભાસિતાનના ॥ ૨૦॥

દિવ્યચૂડામણિસ્ફારચઞ્ચચ્ચન્દ્રકસૂર્યકા ।
ઉદ્યત્કવિસમસ્વચ્છનાસાભરણભાસુરા ॥ ૨૧॥

ચિન્તાકલમ્બિતસ્વચ્છમુક્તાગુચ્છવિરાજિતા ।
પાટીરપઙ્કકર્પૂરકુઙ્કુમાલઙ્કૃતસ્તની ॥ ૨૨॥

વિચિત્રવિવિધાકલ્પા કમ્બુસઙ્કાશકન્ધરા ।
દાડિમીફલબીજાભદન્તપઙ્ક્તિવિરાજિતા ॥ ૨૩॥

અનર્ધ્યરત્નઘટિતમુકુટાઞ્ચિતમસ્તકા ।
મત્તાલિમાલાવિલસદલકાઢ્યમુખામ્બુજા ॥ ૨૪॥

કલઙ્કકાર્શ્યનિર્મુક્તશરચ્ચન્દ્રનિભાનના ।
જાહ્નવીસલિલાવર્તશોભિનાભિવિભૂષિતા ॥ ૨૫॥

માણિક્યશકલાબદ્ધમુદ્રિકાઙ્ગુલિભૂષિતા ।
પુણ્ડરીકદલાકારનયનત્રયસુન્દરી ॥ ૨૬॥

કલ્પિતાચ્છમહારાગપદ્મરાગોજ્જ્વલપ્રભા ।
રત્નકિઙ્કિણિકાયુક્તરત્નકઙ્કણશોભિતા ॥ ૨૭॥

મણિમુક્તાસરાપારલસત્પદકસન્તતિઃ ।
રત્નાઙ્ગુલિપ્રવિતતપ્રભાજાલલસત્કરા ॥ ૨૮॥

કઞ્ચુકીગુમ્ફિતાપારનાનારત્નતતિદ્યુતિઃ ।
મલ્લિકામોદિધમ્મિલ્લમલ્લિકાલિસરાવૃતા ॥ ૨૯॥

સુવૃત્તનિબિડોત્તુઙ્ગકુચભારાલસા શિવા ।

વરપાશાઙ્કુશાભીતિલસદ્બાહુચતુષ્ટયા ॥ ૩૦॥

સર્વશૃઙ્ગારવેષાઢ્યા સુકુમારાઙ્ગવલ્લરી ।
સૌન્દર્યધારાસર્વસ્વા નિર્વ્યાજકરુણામયી ॥ ૩૧॥

નિજસંલાપમાધુર્યવિનિર્ભર્ત્સિતકચ્છપી ।
કોટિકોટિરવીન્દૂનાં કાન્તિં યા બિભ્રતી પરા ॥ ૩૨॥

નાનાસખીભિર્દાસીભિસ્તથા દેવાઙ્ગનાદિભિઃ ।
સર્વાભિર્દેવતાભિસ્તુ સમન્તાત્પરિવેષ્ટિતા ॥ ૩૩॥

ઇચ્છાશક્ત્યા જ્ઞાનશક્ત્યા ક્રિયાશક્ત્યા સમન્વિતા ।
લજ્જા તુષ્ટિસ્તથા પુષ્ટિઃ કીર્તિઃ કાન્તિઃ ક્ષમા દયા ॥ ૩૪॥

બુદ્ધિર્મેધા સ્મૃતિર્લક્ષ્મીર્મૂર્તિમત્યોઽઙ્ગનાઃ સ્મૃતાઃ ।
જયા ચ વિજયા ચૈવાપ્યજિતા ચાપરાજિતા ॥ ૩૫॥

નિત્યા વિલાસિની દોગ્ધ્રી ત્વઘોરા મઙ્ગલા નવ ।
પીઠશક્તય એતાસ્તુ સેવન્તે યાં પરામ્બિકામ્ ॥ ૩૬॥

યસ્યાસ્તુ પાર્શ્વભાગે સ્તો નિધી તૌ શઙ્ખપદ્મકૌ ।
નવરત્નવહા નદ્યસ્તથા વૈ કાઞ્ચનસ્રવાઃ ॥ ૩૭॥

સપ્તધાતુવહા નદ્યો નિધિભ્યાં તુ વિનિર્ગતાઃ ।
સુધાસિન્ધ્વન્તગામિન્યસ્તાઃ સર્વા નૃપસત્તમ ॥ ૩૮॥

સા દેવી ભુવનેશાની તદ્વામાઙ્કે વિરાજતે ।
સર્વેશત્વં મહેશસ્ય યત્સઙ્ગાદેવ નાન્યથા ॥ ૩૯॥

ચિન્તામણિગૃહસ્યાસ્ય પ્રમાણં શૃણુ ભૂમિપ ।
સહસ્રયોજનાયામં મહાન્તસ્તત્પ્રચક્ષતે ॥ ૪૦॥

તદુત્તરે મહાશાલાઃ પૂર્વસ્માદ્દ્વિગુણાઃ સ્મૃતાઃ ।
અન્તરિક્ષગતં ત્વેતન્નિરાધારં વિરાજતે ॥ ૪૧॥

સઙ્કોચશ્ચ વિકાસશ્ચ જાયતેઽસ્ય નિરન્તરમ્ ।
પટવત્કાર્યવશતઃ પ્રલયે સર્જને તથા ॥ ૪૨॥

શાલાનાં ચૈવ સર્વેષાં સર્વકાન્તિપરાવધિ ।
ચિન્તામણિગૃહં પ્રોક્તં યત્ર દેવી મહોમયી ॥ ૪૩॥

યે યે ઉપાસકાઃ સન્તિ પ્રતિબ્રહ્માણ્ડવર્તિનઃ ।
દેવેષુ નાગલોકેષુ મનુષ્યેષ્વિતરેષુ ચ ॥ ૪૪॥

શ્રીદેવ્યાસ્તે ચ સર્વેઽપિ વ્રજન્ત્યત્રૈવ ભૂમિપ ।
દેવીક્ષેત્રે યે ત્યજન્તિ પ્રાણાન્દેવ્યર્ચને રતાઃ ॥ ૪૫॥

તે સર્વે યાન્તિ તત્રૈવ યત્ર દેવી મહોત્સવા ।
ઘૃતકુલ્યા દુગ્ધકુલ્યા દધિકુલ્યા મધુસ્રવાઃ ॥ ૪૬॥

સ્યન્દન્તિ સરિતઃ સર્વાસ્તથામૃતવહાઃ પરાઃ ।
દ્રાક્ષારસવહાઃ કાશ્ચિજ્જમ્બૂરસવહાઃ પરાઃ ॥ ૪૭॥

આમ્રેક્ષુરસવાહિન્યો નદ્યસ્તાસ્તુ સહસ્રશઃ ।
મનોરથફલા વૃક્ષા વાપ્યઃ કૂપાસ્તથૈવ ચ ॥ ૪૮॥

યથેષ્ટપાનફલદા ન ન્યૂનં કિઞ્ચિદસ્તિ હિ ।
ન રોગપલિતં વાપિ જરા વાપિ કદાચન ॥ ૪૯॥

ન ચિન્તા ન ચ માત્સર્યં કામક્રોધાદિકં તથા ।
સર્વે યુવાનઃ સસ્ત્રીકા સહસ્રાદિત્યવર્ચસઃ ॥ ૫૦॥

ભજન્તિ સતતં દેવીં તત્ર શ્રીભુવનેશ્વરીમ્ ।
કેચિત્સલોકતાપન્નાઃ કેચિત્સામીપ્યતાં ગતાઃ ॥ ૫૧॥

સરૂપતાં ગતાઃ કેચિત્સાર્ષ્ટિતાં ચ પરે ગતાઃ ।
યા યાસ્તુ દેવતાસ્તત્ર પ્રતિબ્રહ્માણ્ડવર્તિનામ્ ॥ ૫૨॥

સમષ્ટયઃ સ્થિતાસ્તાસ્તુ સેવન્તે જગદીશ્વરીમ્ ।
સપ્તકોટિમહામન્ત્રા મૂર્તિમન્ત ઉપાસતે ॥ ૫૩॥

મહાવિદ્યાશ્ચ સકલાઃ સામ્યાવસ્થાત્મિકાં શિવામ્ ।
કારણબ્રહ્મરૂપાં તાં માયાશબલવિગ્રહામ્ ॥ ૫૪॥

ઇત્થં રાજન્ મયા પ્રોક્તં મણિદ્વીપં મહત્તરમ્ ।
ન સૂર્યચન્દ્રૌ નો વિદ્યુત્કોટયોઽગ્નિસ્તથૈવ ચ ॥ ૫૫॥

એતસ્ય ભાસા કોટ્યંશકોટ્યંશેનાપિ તે સમાઃ ।
ક્વચિદ્વિદ્રુમસકાશં ક્વચિન્મરકતચ્છવિ ॥ ૫૬॥

વિદ્યુદ્ભાનુસમચ્છાયં મધ્યસૂર્યસમં ક્વચિત્ ।
વિદ્યુત્કોટિમહાધારા સારકાન્તિતતં ક્વચિત્ ॥ ૫૭॥

ક્વચિત્સિન્દૂરનીલેન્દ્રમાણિક્યસદૃશચ્છવિ ।
હીરસારમહાગર્ભધગદ્ધગિતદિક્તટમ્ ॥ ૫૮॥

કાન્ત્યા દાવાનલસમં તપ્તકાઞ્ચનસન્નિભમ્ ।
ક્વચિચ્ચન્દ્રોપલોદ્ગારં સૂર્યોદ્ગારં ચ કુત્રચિત્ ॥ ૫૯॥

રત્નશૃઙ્ગિસમાયુક્તં રત્નપ્રાકારગોપુરમ્ ।
રત્નપત્રૈ રત્નફલૈર્વૃક્ષૈશ્ચ પરિમણ્ડિતમ્ ॥ ૬૦॥

નૃત્યન્મયૂરસઙ્ઘૈશ્ચ કપોતરણિતોજ્જ્વલમ્ ।
કોકિલાકાકલીલાપૈઃ શુકલાપૈશ્ચ શોભિતમ્ ॥ ૬૧॥

સુરમ્યરમણીયામ્બુલક્ષાવધિસરોવૃતમ્ ।
તન્મધ્યભાગવિલસદ્વિકચદ્રત્નપઙ્કજૈઃ ॥ ૬૨॥

સુગન્ધિભિઃ સમન્તાત્તુ વાસિતં શતયોજનમ્ ।
મન્દમારુતસમ્ભિન્નચલદ્દ્રુમસમાકુલમ્ ॥ ૬૩॥

ચિન્તામણિસમૂહાનાં જ્યોતિષા વિતતામ્બરમ્ ।
રત્નપ્રભાભિરભિતો ધગદ્ધગિતદિક્તટમ્ ॥ ૬૪॥

વૃક્ષવાતમહાગન્ધવાતવાતસુપૂરિતમ્ ।
ધૂપધૂપાયિતં રાજન્ મણિદીપાયુતોજ્જ્વલમ્ ॥ ૬૫॥

મણિજાલકસચ્છિદ્રતરલોદરકાન્તિભિઃ ।
દિઙ્મોહજનકં ચૈતદ્દર્પણોદરસંયુતમ્ ॥ ૬૬॥

ઐશ્વર્યસ્ય સમગ્રસ્ય શૃઙ્ગારસ્યાખિલસ્ય ચ ।
સર્વજ્ઞતાયાઃ સર્વાયાસ્તેજસશ્ચાખિલસ્ય વૈ ॥ ૬૭॥

પરાક્રમસ્ય સર્વસ્ય સર્વોત્તમગુણસ્ય ચ ।
સકલાયા દયાયાશ્ચ સમાપ્તિરિહ ભૂપતે ॥ ૬૮॥

રાજ્ઞ આનન્દમારભ્ય બ્રહ્મલોકાન્તભૂમિષુ ।
આનન્દા યે સ્થિતાઃ સર્વે તેઽત્રૈવાન્તર્ભવન્તિ હિ ॥ ૬૯॥

ઇતિ તે વર્ણિતં રાજન્ મણિદ્વીપં મહત્તરમ્ ।
મહાદેવ્યાઃ પરં સ્થાનં સર્વલોકોત્તમોત્તમમ્ ॥ ૭૦॥

એતસ્ય સ્મરણાત્સદ્યઃ સર્વં પાપં વિનશ્યતિ ।

પ્રાણોત્ક્રમણસન્ધૌ તુ સ્મૃત્વા તત્રૈવ ગચ્છતિ ॥ ૭૧॥

અધ્યાયપઞ્ચકં ત્વેતત્પઠેન્નિત્યં સમાહિતઃ ।
ભૂતપ્રેતપિશાચાદિબાધા તત્ર ભવેન્ન હિ ॥ ૭૨॥

નવીનગૃહનિર્માણે વાસ્તુયાગે તથૈવ ચ ।
પઠિતવ્યં પ્રયત્નેન કલ્યાણં તેન જાયતે ॥ ૭૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં દ્વાદશસ્કન્ધે
મણિદ્વીપવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨.૧૨॥

## ૧૨.૧૩ ત્રયોદશોઽધ્યાયઃ । જનમેજયેનામ્બામખકરણ-દેવીભાગવતશ્રવણપૂર્વકં સ્વપિત્રુદ્ધારવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ તે કથિતં ભૂપ યદ્યત્પૃષ્ટં ત્વયાનઘ ।
નારાયણેન યત્પ્રોક્તં નારદાય મહાત્મને ॥ ૧॥

શ્રુત્વૈતત્તુ મહાદેવ્યાઃ પુરાણં પરમાદ્ભુતમ્ ।
કૃતકૃત્યો ભવેન્મર્ત્યો દેવ્યાઃ પ્રિયતમો હિ સઃ ॥ ૨॥

કુરુ ચામ્બામખં રાજન્ સ્વપિત્રુદ્ધરણાય વૈ ।
ખિન્નોઽસિ યેન રાજેન્દ્ર પિતુર્જ્ઞાત્વા તુ દુર્ગતિમ્ ॥ ૩॥

ગૃહાણ ત્વં મહાદેવ્યા મન્ત્રં સર્વોત્તમોત્તમમ્ ।
યથાવિધિવિધાનેન જન્મસાફલ્યદાયકમ્ ॥ ૪॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા નૃપશાર્દૂલઃ પ્રાર્થયિત્વા મુનીશ્વરમ્ ।
તસ્માદેવ મહામન્ત્રં દેવીપ્રણવસંજ્ઞકમ્ ॥ ૫॥

દીક્ષાવિધિં વિધાનેન જગ્રાહ નૃપસત્તમઃ ।
તત આહૂય ધૌમ્યાદીન્નવરાત્રસમાગમે ॥ ૬॥

અમ્બાયજ્ઞં ચકારાશુ વિત્તશાઠ્યવિવર્જિતઃ ।
બ્રાહ્મણૈઃ પાઠયામાસ પુરાણં ત્વેતદુત્તમમ્ ॥ ૭॥

શ્રીદેવ્યગ્રેઽમ્બિકાપ્રીત્યૈ દેવીભાગવતં પરમ્ ।

બ્રાહ્મણાન્ભોજયામાસાપ્યસઙ્ખ્યાતાન્સુવાસિનીઃ ॥ ૮॥

કુમારીર્વટુકાદીંશ્ચ દીનાનાથાંસ્તથૈવ ચ ।
દ્રવ્યપ્રદાનૈસ્તાન્સર્વાન્ સન્તોષ્ય વસુધાધિપઃ ॥ ૯॥

સમાપ્ય યજ્ઞં સંસ્થાને સંસ્થિતો યાવદેવ હિ ।
તાવદેવ હિ ચાકાશાન્નારદઃ સમવાતરત્ ॥ ૧૦॥

રણયન્મહતીં વીણાં જ્વલદગ્નિશિખોપમઃ ।
સસમ્ભમઃ સમુત્થાય દૃષ્ટ્વા તં નારદં મુનિમ્ ॥ ૧૧॥

આસનાદ્યુપચારૈશ્ચ પૂજયામાસ ભૂમિપઃ ।
કૃત્વા તુ કુશલપ્રશ્નં પપ્રચ્છાગમકારણમ્ ॥ ૧૨॥

રાજોવાચ ।
કુત આગમનં સાધો બ્રૂહિ કિં કરવાણિ તે ।
સનાથોઽહં કૃતાર્થોઽહં ત્વદાગમનકારણાત્ ॥ ૧૩॥

ઇતિ રાજ્ઞો વચઃ શ્રુત્વા પ્રોવાચ મુનિસત્તમઃ ।
અદ્યાશ્ચર્યં મયા દૃષ્ટં દેવલોકે નૃપોત્તમ ॥ ૧૪॥

તન્નિવેદયિતું પ્રાપ્તસ્ત્વત્સકાશે સુવિસ્મિતઃ ।
પિતા તે દુર્ગતિં પ્રાપ્તો નિજકર્મવિપર્યયાત્ ॥ ૧૫॥

સ એવાયં દિવ્યરૂપવપુર્ભૂત્વાદ્યુનૈવ હિ ।
દેવદેવૈઃ સ્તુતઃ સમ્યગપ્સરોભિઃ સમન્તતઃ ॥ ૧૬॥

વિમાનવરમારુહ્ય મણિદ્વીપં ગતોઽભવત્ ।
દેવીભાગવતસ્યાસ્ય શ્રવણોત્થફલેન ચ ॥ ૧૭॥

અમ્બામખફલેનાપિ પિતા તે સુગતિં ગતઃ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ જીવિતં સફલં તવ ॥ ૧૮॥

નરકાદુદ્ધૃતસ્તાતસ્ત્વયા તુ કુલભૂષણ ।
દેવલોકે સ્ફીતકીર્તિસ્તવાદ્ય વિપુલાભવત્ ॥ ૧૯॥

સૂત ઉવાચ ।
નારદોક્તં સમાકર્ણ્ય પ્રેમગદ્ગદિતાન્તરઃ ।
પપાત પાદામ્બુજયોર્વ્યાસસ્યાદ્ભુતકર્મણઃ ॥ ૨૦॥

તવાનુગ્રહતો દેવ કૃતાર્થોઽહં મહામુને ।

કિં મયા પ્રતિકર્તવ્યં નમસ્કારાદૃતે તવ ॥ ૨૧॥

અનુગ્રાહ્યઃ સદૈવાહમેવમેવ ત્વયા મુને ।
ઇતિ રાજ્ઞો વચઃ શ્રુત્વાપ્યાશીર્ભિરભિનન્ઘ ચ ॥ ૨૨॥

ઉવાચ વચનં શ્લક્ષ્ણં ભગવાન્ બાદરાયણઃ ।
રાજન્સર્વં પરિત્યજ્ય ભજ દેવીપદામ્બુજમ્ ॥ ૨૩॥

દેવીભાગવતં ચૈવ પઠ નિત્યં સમાહિતઃ ।
અમ્બામખં સદા ભક્ત્યા કુરુ નિત્યમતન્દ્રિતઃ ॥ ૨૪॥

અનાયાસેન તેન ત્વં મોક્ષ્યસે ભવબન્ધનાત્ ।
સન્ત્યન્યાનિ પુરાણાનિ હરિરુદ્રમુખાનિ ચ ॥ ૨૫॥

દેવીભાગવતસ્યાસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ।
સારમેતત્પુરાણાનાં વેદાનાં ચૈવ સર્વશઃ ॥ ૨૬॥

મૂલપ્રકૃતિરેવૈષા યત્ર તુ પ્રતિપાદ્યતે ।
સમં તેન પુરાણં સ્યાત્કથમન્યન્નૃપોત્તમ ॥ ૨૭॥

પાઠે વેદસમં પુણ્યં યસ્ય સ્યાજ્જનમેજય ।
પઠિતવ્યં પ્રયત્નેન તદેવ વિબુધોત્તમૈઃ ॥ ૨૮॥

ઇત્યુક્ત્વા નૃપવર્યં તં જગામ મુનિરાટ્ તતઃ ।
જગ્મુશ્ચૈવ યથાસ્થાનં ધૌમ્યાદિમુનયોઽમલાઃ ॥ ૨૯॥

દેવીભાગવતસ્યૈવ પ્રશંસાં ચક્રુરુત્તમામ્ ।
રાજા શશાસ ધરણીં તતઃ સન્તુષ્ટમાનસઃ ।
દેવીભાગવતં ચૈવ પઠચ્છૃણ્વન્નિરન્તરમ્ ॥ ૩૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં દ્વાદશસ્કન્ધે
જનમેજયેનામ્બામખકરણ-દેવીભાગવતશ્રવણપૂર્વકં
સ્વપિત્રુદ્ધારવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૨.૧૩॥

## ૧૨.૧૪ ચતુર્દશોઽધ્યાયઃ । શ્રીમદ્દેવીભાગવતમહાપુરાણ-શ્રવણફલવર્ણનમ્ ।

સૂત ઉવાચ ।
અર્ધશ્લોકાત્મકં યત્તુ દેવીવક્ત્રાબ્જનિર્ગતમ્ ।

શ્રીમદ્ભાગવતં નામ વેદસિદ્ધાન્તબોધકમ્ ॥ ૧॥

ઉપદિષ્ટં વિષ્ણુવે યદ્વટપત્રનિવાસિને ।
શતકોટિપ્રવિસ્તીર્ણં તત્કૃતં બ્રહ્મણા પુરા ॥ ૨॥

તત્સારમેકતઃ કૃત્વા વ્યાસેન શુકહેતવે ।
અષ્ટાદશસહસ્રં તુ દ્વાદશસ્કન્ધસંયુતમ્ ॥ ૩॥

દેવીભાગવતં નામ પુરાણં ગ્રથિતં પુરા ।
અદ્યાપિ દેવલોકે તદ્બહુવિસ્તીર્ણમસ્તિ હિ ॥ ૪॥

નાનેન સદૃશં પુણ્યં પવિત્રં પાપનાશનમ્ ।
પદે પદેઽશ્વમેધસ્ય ફલમાપ્નોતિ માનવઃ ॥ ૫॥

પૌરાણિકં પૂજયિત્વા વસ્ત્રાદ્યાભરણાદિભિઃ ।
વ્યાસબુદ્ધ્યા તન્મુખાત્તુ શ્રુત્વૈતત્સમુપોષિતઃ ॥ ૬॥

લિખિત્વા નિજહસ્તેન લેખકેનાથવા મુને ।
પ્રૌષ્ઠપદ્યાં પૌર્ણમાસ્યાં હેમસિંહસમન્વિતમ્ ॥ ૭॥

દદ્યાત્પૌરાણિકાયાથ દક્ષિણાં ચ પયસ્વિનીમ્ ।
સાલઙ્કૃતાં સવત્સાં ચ કપિલાં હેમમાલિનીમ્ ॥ ૮॥

ભોજયેદ્બ્રાહ્મણાનન્તેઽપ્યધ્યાયપરિસમ્મિતાન્ ।
સુવાસિનીસ્તાવતીશ્ચ કુમારીર્બટુકૈઃ સહ ॥ ૯॥

દેવીબુદ્ધ્યા પૂજયેત્તાન્વસનાભરણાદિભિઃ ।
પાયસાન્નવરેણાપિ ગન્ધસ્રક્કુસુમાદિભિઃ ॥ ૧૦॥

પુરાણદાનેનૈતેન ભૂદાનસ્ય ફલં લભેત્ ।
ઇહલોકે સુખી ભૂત્વાપ્યન્તે દેવીપુરં વ્રજેત્ ॥ ૧૧॥

નિત્યં યઃ શૃણુયાદ્ભક્ત્યા દેવીભાગવતં પરમ્ ।
ન તસ્ય દુર્લભં કિઞ્ચિત્કદાચિત્ક્વચિદસ્તિ હિ ॥ ૧૨॥

અપુત્રો લભતે પુત્રાન્ધનાર્થી ધનમાપ્નુયાત્ ।
વિદ્યાર્થી પ્રાપ્નુયાદ્વિદ્યાં કીર્તિમણ્ડિતભૂતલઃ ॥ ૧૩॥

વન્ધ્યા વા કાકવન્ધ્યા વા મૃતવન્ધ્યા ચ યાઙ્ગના ।
શ્રવણાદસ્ય તદ્દોષાન્નિવર્તેત ન સંશયઃ ॥ ૧૪॥

યદ્ગેહે પુસ્તકં ચૈતત્પૂજિતં યદિ તિષ્ઠતિ ।
તદ્ગેહં ન ત્યજેન્નિત્યં રમા ચૈવ સરસ્વતી ॥ ૧૫॥

નેક્ષન્તે તત્ર વેતાલડાકિનીરાક્ષસાદયઃ ।
જ્વરિતં તુ નરં સ્પૃષ્ટ્વા પઠેદેતત્સમાહિતઃ ॥ ૧૬॥

મણ્ડલાન્નાશમાપ્નોતિ જ્વરો દાહસમન્વિતઃ ।
શતાવૃત્ત્યાસ્ય પઠનાત્ક્ષયરોગો વિનશ્યતિ ॥ ૧૭॥

પ્રતિસન્ધ્યં પઠેદ્યસ્તુ સન્ધ્યાં કૃત્વા સમાહિતઃ ।
એકૈકમસ્ય ચાધ્યાયં સ નરો જ્ઞાનવાન્ભવેત્ ॥ ૧૮॥

શકુનાંશ્ચૈવ વીક્ષેત કાર્યાકાર્યેષુ ચૈવ હિ ।
તત્પ્રકારઃ પુરસ્તાત્તુ કથિતોઽસ્તિ મયા મુને ॥ ૧૯॥

નવરાત્રે પઠેન્નિત્યં શારદીયેઽતિભક્તિતઃ ।
તસ્યામ્બિકા તુ સન્તુષ્ટા દદાતીચ્છાધિકં ફલમ્ ॥ ૨૦॥

વૈષ્ણવૈશ્ચૈવ શૈવૈશ્ચ રમોમા પ્રીયતે સદા ।
સૌરૈશ્ચ ગાણપત્યૈશ્ચ સ્વેષ્ટશક્તેશ્ચ તુષ્ટયે ॥ ૨૧॥

પઠિતવ્યં પ્રયત્નેન નવરાત્રચતુષ્ટયે ।
વૈદિકૈર્નિજગાયત્રીપ્રીતયે નિત્યશો મુને ॥ ૨૨॥

પઠિતવ્યં પ્રયત્નેન વિરોધો નાત્ર કસ્યચિત્ ।
ઉપાસના તુ સર્વેષાં શક્તિયુક્તાસ્તિ સર્વદા ॥ ૨૩॥

તચ્છક્તેરેવ તોષાર્થં પઠિતવ્યં સદા દ્વિજૈઃ ।
સ્ત્રીશૂદ્રો ન પઠેદેતત્કદાપિ ચ વિમોહિતઃ ॥ ૨૪॥

શ‍ૃણુયાદ્દ્વિજવક્ત્રાત્તુ નિત્યમેવેતિ ચ સ્થિતિઃ ।
કિં પુનર્બહુનોક્તેન સારં વક્ષ્યામિ તત્ત્વતઃ ॥ ૨૫॥

વેદસારમિદં પુણ્યં પુરાણં દ્વિજસત્તમાઃ ।
વેદપાઠસમં પાઠે શ્રવણે ચ તથૈવ હિ ॥ ૨૬॥

સચ્ચિદાનન્દરૂપાં તાં ગાયત્રીપ્રતિપાદિતામ્ ।
નમામિ હ્રીંમયીં દેવીં ધિયો યો નઃ પ્રચોદયાત્ ॥ ૨૭॥

ઇતિ સૂતવચઃ શ્રુત્વા નૈમિષીયાસ્તપોધનાઃ ।
પૂજયામાસુરત્યુચ્ચૈઃ સૂતં પૌરાણિકોત્તમમ્ ॥ ૨૮॥

પ્રસન્નહૃદયાઃ સર્વે દેવીપાદામ્બુજાર્ચકાઃ ।
નિર્વૃતિં પરમાં પ્રાપ્તાઃ પુરાણસ્ય પ્રભાવતઃ ॥ ૨૯॥

નમશ્ચક્રુઃ પુનઃ સૂતં ક્ષમાપ્ય ચ મુહુર્મુહુઃ ।
સંસારવારિધેસ્તાત પ્લવોઽસ્માકં ત્વમેવ હિ ॥ ૩૦॥

ઇતિ સ મુનિવરાણામગ્રતઃ શ્રાવયિત્વા
સકલનિગમગુહ્યં દૌર્ગમેતત્પુરાણમ્ ।
નતમથ મુનિસઙ્ઘં વર્ધયિત્વાઽઽશિષામ્બા-
ચરણકમલભૃઙ્ગો નિર્જગામાથ સૂતઃ ॥ ૩૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં દ્વાદશસ્કન્ધે શ્રીમદ્દેવીભાગવતમહાપુરાણ-
શ્રવણફલવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૨.૧૪॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે દ્વાદશસ્કન્ધઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતમહાપુરાણે ઉત્તરાર્ધઃ સમ્પૂર્ણઃ ॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતમહાપુરાણં સમાપ્તમ્ ॥

Encoded and proofread by Vishwas Bhide

*12 Shrimaddevibhagavatamahapurane Dvadashah Skandhah*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*